

॥ ॐ ॥

For private circulation only.

नितान्तं गोपनीयम् ।

❀ पञ्चसायकः ❀

श्रीकविशेखर ज्योतीश्वराचार्य-
विरचितः

पालयँल्लौकिकीं पुण्यां पुरुषार्थत्रयस्थितिम् ।
कामशास्त्ररहस्यज्ञः सुख माप्नोति शाश्वतम् ॥१॥

श्रीमद्वैद्यरत्न पण्डित-जीवानन्दशर्मतनूजेन
वैद्यराज घिलडियालोपाह्वेन

सदानन्द-शास्त्रिणा परिशोधितः


सारगर्भितया भूमिकया विषयसूच्यादिभिश्च संयोजितः ।

प्राप्तिस्थानम्— मोतीलाल बनारसीदास,

पञ्जाब संस्कृत पुस्तकालय,
सैदमिट्ठा बाजार लाहौर ।

Published by
Punjab Sanskrit Book Depot,
LAHORE

PRINTED AT
THE BOMBAY SANSKRIT PRESS
LAHORE



भूमिका

साधकवर्गसमीहित-पूरणरसिका सदा ऽऽगमख्याता ।
श्रीनगरस्थितपीठा सततं श्रीकंसमर्दिनी जयति ॥ १ ॥
आदरणीयाचारौ चारुविचारौ महोदारौ ।
आश्रितशिवोपचारौ मातापितरौ चिरं वन्दे ॥ २ ॥



हं हो प्रणयामृतपानजनितामन्दानन्दसन्दोहभरालसाः ! कामकलाकलापरहस्यविज्ञानविस्तारितगार्हस्थ्यसुखविलासाः ! विलासिनीविलसिताकलनलालसाः ! संजातव्यवहारचातुर्याऽऽश्चर्यतोदया ! महोदया ! सहृदयाः !

नैतत्र विदितत्तरं नैसर्गिकपरीक्षणप्रणयिप्रावीण्यविलक्षणधिषाणानां धिषणमहोदराणां विबुधधुरीणानां तत्रभवतां प्रेक्षावतां यत प्रतिक्षणर्वलक्षण्योपलक्षितप्रावीण्यपूर्णप्रणयनप्रणायिनः परब्रह्मणः प्रपश्चिताकुञ्चनविकुञ्चनोदाञ्चिते प्रपञ्चे तत्तदानुकूल्योपलक्षितेषु यत्रतत्रोपलभ्यमानेषु समुपेयसुखावहपदार्थनिवहेषु धर्मार्थकाममोक्षस्वरूपस्य पुरुषार्थस्यैव प्राधान्यं वरीवर्तीति ।

तत्परिज्ञानाय च हस्तामलकीकृताखण्डब्रह्माण्डभाण्डविज्ञानरत्नराशिभिः गण्धण्डलप्रमुखाखिलविबुधमण्डलीमुकुटमणिमरीचिमण्डितचरणनखांशुमण्डलैः प्रकाण्डपण्डितैः व्यासवसिष्ठजैमिनिगौतमकणादनारदमनुशुक्रवात्स्यायनादिभि महर्षिभिः, मनुस्मृतिप्रभृतीनि

धर्माभिधायकशास्त्राणि, शुक्रनीत्यादीनि अर्थतत्त्वार्थसमर्पकशास्त्राणि, कामसूत्रादीनि कामशास्त्राणि, ब्रह्मसूत्रप्रभृतीनि मोक्षाभिधायकशास्त्राणि, समासव्यासरूपेण शतशस्तत्र तत्राऽनिर्मायिन्त । तत्र यथा धर्मार्थमोक्षाणां त्रयाणां पुरुषार्थानां स्वस्वरहस्यार्थसमर्थने तत्तच्छास्त्राण्येव परं जयन्ति तथेह कामाभिधतृतीयपुरुषार्थरहस्यसमर्थकत्वे परं प्रभवति कामागम एव ।

अस्य च कामागमस्य प्रणेतारो नन्दिप्रमुख श्वेतकेतु बाभ्रव्य दत्तक सुवर्णनाभ घोटकमुख गोनर्दीय गोणिकापुत्र कोक्कोक कुचिमारवीरभद्र रन्तिदेव जयदेव कविशेखराचार्य चारायण बादरायणादयो बहवो विद्वच्छिरोमुक्तामणयः समभूवन् ।

अनेके च कामसूत्र कन्दर्पचूडामणि कामरत्न रतिरहस्य नागर सर्वस्व रसिकसर्वस्व मन्मथसंहिता अनङ्गरङ्ग, रतिमञ्जरी पञ्चसायक प्रभृतयः कामागमविषयका ग्रन्था श्रुतिगोचरीभवन्ति । येषु हि दृष्टिपथमवतरन्ति कियन्तः कुत्रचित साम्प्रतमपि । तेष्वेवाऽन्यतमोऽयं पञ्चसायकाख्योऽलम्सन्दर्भो ग्रन्थः । यो हि दुरधिगमं कामागमरहस्यं सद्वाक्यैः सरलैः सुनिर्मलैश्च पद्यैः सुविशदं निरूपयति ।

अस्य च प्रणेता "श्रीकण्ठार्चनपरायणः सङ्गीतागमज्ञानरचना चातुर्यचिन्तामणि कविशेखरपदलाञ्छितो ज्योतीश्वराचार्यः कवीन्द्रः" इति—

"अस्ति प्रत्यहमर्थितापहरणं प्रौढ्यैकदीक्षागुरुः
श्रीकण्ठार्चनतत्परो भुवि चतुःषष्ठेः कलानां निधिः ।
सङ्गीतागमसत्प्रमेयरचनाचातुर्यचिन्तामणिः
प्रख्यातः कविशेखरार्चितपदः श्रीज्योतिरीशः कृती ॥

इत्यनेन पद्येन स्वयमेव ग्रन्थकृता प्रतिपादितम् ।

अयश्च कवीन्द्रः कतमं देशं मलञ्चकार, कदा प्रदुर्भूय, धियन्ति

याऽन्यानि एतत्प्रणीतानि ग्रन्थरत्नानि ("सङ्गीतागम" इत्यादि ना-म्नयमेव सङ्गीतशास्त्रग्रन्थप्रणेतृत्वं प्रदर्शितमनेन)

इति न शक्यते याथातथ्येन विनिश्चेतुम् ।

ग्रन्थश्चायं कवीन्द्रेण पञ्चभिः सायकैः समापितः । तत्र प्रथमे सायके नायकलक्षणम्, नलिन्यादयश्चत्वारः स्त्रीभेदाः, तल्लक्षणानि स्त्रीणां दक्षिणवामपार्श्वयोः सितासितपक्षयोः प्रतिपदादितिथिक्रमेण कामस्यारोहावरोहौ, तत्तदङ्गप्रत्यङ्गालिङ्गनादिना अङ्गनानां द्रुतद्रावणम्, तिथिभेदेन नलिन्यादीनां द्रावणोपायाः, तासां सुरतोत्सवोचितः काल, इत्यादयो विषया व्यवस्यन्त ।

द्वितीयसायके च शशादय पुरुषभेदा, तल्लक्षणानि, मृग्यादयः स्त्रीभेदाः, नव समसुरतभेदाः, षड् विषमरतभेदाः, प्रचण्डादिभेदेन सुरतस्य वैविध्यम तत्तद्देशीयानां स्त्रीणां स्वरूपाणि पद्मकादिसाद-श्येन चत्वारो वराङ्गभेदा, तेषां प्राशस्त्यम्, प्रीतिभेदाः" इत्येवमादयश्च विषया प्रदर्शिता ।

तृतीये सायके च—

तत्तदङ्गप्रत्यङ्गदौर्गन्ध्यहरा बहवो भेषजप्रयोगाः, सर्वाङ्गसौर-भकराः स्नानीयप्रदेहाः, सामान्या विशेषाश्च अङ्गरागाः, मुखवासकरा विविधा प्रयोगा, वाजीकरणार्थो स्तत्तदौषधचूर्णस्वरसादिप्रयोगाः, योनिगाढीकरणोपायाः, सिन्दूरादिप्रलेपादयो वनिताद्रावणोपायाः, ध्वजदार्ढ्यवृद्धिकरा उपदेशा, धैर्यस्तम्भनोपायाः स्त्रीपुरुषवशीकरणो-पायाः, अभीष्टसिद्धिप्रदा चामुण्डादिमन्त्राः, नलिन्यादीनां स्त्रीणां वशीकरणमन्त्राः, योनिसौभाग्यकरा धूपादिप्रयोगाः, गर्भधारणो-पायाः, इत्येवमादयो ज्ञातव्या विषया सुनिरूपिताः ।

चतुर्थे च सायके—

कन्यकानां वरणम्, तासां गुणा दोषाश्च, वराणां गुणा दोषाश्च, ब्रा-ह्मादयो विवाहस्य अष्टौ भेदाः, तेषां लक्षणानि च, परदारगमने दूष्यानि.

दौत्यकर्मोचिता स्त्रियः, सुखसाध्यानां कष्टसाध्यानाञ्च स्त्रीणां लक्षणानि सुरते वर्जनीया नार्यः, सुरतोचितानुचितस्थानानि, आलिङ्गनभेदा स्तल्लक्षणानि, चुम्बनभेदा, तेषां स्वरूपाणि, नखाघातस्थानानि, दशन क्षतस्थानानि, तद्विशेषाश्च, इत्येवमाद्यो विषयाः समुपन्यस्ताः सन्ति

पञ्चमे सायके च—

मदनातपत्रस्थानीया स्तिस्रो नाड्य, तासां लक्षणानि, करणप्रक रणेऽवश्यं ज्ञातव्या विषयाः, नागरादय उत्तानबन्धभेदाः, उपवीत कादयः पार्श्वबन्धप्रकाराः, पद्मासनादय उपविष्टबन्धभेदाः, हारिणा द्यस्त्वधोबन्धप्रकाराः विपरीतबन्धः, तद्योग्याः स्त्रियः, आनन्दोदय व्यञ्जकानि चिन्हानि, स्वाधीनपतिकाद्या अष्टौ नायिकाभेदाः, तल्लक्ष णानि" इत्येवमाद्यो ऽत्यावश्यकाः विषया स्तथाप्रतिपादिता यथा सुकुमारधियोऽपि नितरामचिरेणैव विज्ञातुं प्रभवेयुः। अस्य च ग्रन्थस्य कामसूत्राद्यपेक्षया ऽतिसरलत्वेन सर्वजनसमादरणीयत्व मिति नास्त्यत्र काऽपिशङ्कावसरः। अयञ्च (कामागमः) गृहस्थाश्रमयात्रा मभिपारयिषुभिः, निरतिशयपरमानन्दसन्दोहदाम्पत्यानन्द-सन्दोह रसमास्वादयिषुभि, सुरतोत्सवप्रकरणचातुर्यांचार्यताऽऽदित्सुभिर्वा साजनचरित्रवैचित्र्यप्रतिपित्सुभि, दुर्व्यवहारजिहासुभि कामकला रहस्यामृतपिपासुभि पुम्भि रवश्यमेव जिज्ञासितव्योऽध्येतव्य परि शीलयितव्यश्चेति निर्विवाद मेतत्।

अत एव सुष्ठुक्तं किल केनाऽपि कविकुलकोकिलेन —

दाम्पत्यसुखसिद्ध्यर्थं कामशास्त्रं समभ्यसेत् ।
तदभ्यासादनिर्वाच्य समन्दानन्दमश्नुते ॥ १ ॥
कामशास्त्रविहीनानां गतिः पाशविकी मता ।
तदभ्यासान्न सौख्यं स्यात् केवलं दुःख माप्नुयात् ॥ २ ॥

अपिच—

संसारे तु धरासारं धरायां नगरं मतम् ।
आगारं नगरे तत्र सारं सारङ्गलोचना ॥ ३ ॥
सारङ्गलोचनायाश्च सुरतं सारमुच्यते ।
नातः परतरं सारं विद्यते सुखदं नृणाम् ॥ ४ ॥
सारभूतन्तु सर्वेषां परमानन्दमोदरम् ।
सुरतं ये न सेवन्ते तेषां जन्मैव निष्फलम् ॥ ५ ॥

अस्य चार्थस्य प्राशस्त्यं पारमेश्वरज्ञानराशिरूपाणामुपनिषदां मध्यादिकतमायां बृहदारण्यकाख्योपनिषदि—

"तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"—इत्यनया उपमेयभूतस्य ब्रह्मानन्दस्य उपमानीकृतं प्रियतमाविषयकानन्दं समुपवर्णयन्त्या श्रुत्या एव समर्थितम् ।

अपिच—

कीदृशी गृहिणी योग्या गृहिणां भवति ध्रुवम् ।
कथं किमुपदेष्टव्या तत्तत्कर्मप्रसाधने ॥
गृहकर्मणि नर्मणि प्रावीण्यं वृणुयात्कथम् ।
कथं स्वल्पातिबलं सा सौशील्य मनुशीलयेत् ॥
व्यापारेण च केनेह तूर्णं वीणाविनादिनी ।
तरुणी रमणी चापि भवेत्पूर्णानुरागिणी ॥
अनङ्गरङ्गप्रतिमां दयितां हृदयङ्गमाम् ।
समासाद्य निशायामं कथम्वा ह्यनुकूलयेत् ॥

दृग्विदग्धमनोज्ञस्य यासां दृग् जीवितप्रदा ।
ता वामलोचनाश्चात्र पर्यालोच्याः कथं बुधैः ॥

इत्यादिकं परिज्ञेयं सर्वभूतसुखप्रदम् ।
रतिशास्त्रेण विज्ञाय शाश्वतं सुखमश्नुते ॥

अपिच—

एतच्छास्त्रपरिज्ञानमन्तरा कीदृशी कुमारी परिणेया, परिणीतायाश्च प्रणयः प्रथमं कथं प्रणेतव्यः, कथञ्च तस्याः स्वान्तं नितान्तमात्मन्यासञ्जनीयम्, कीदृशी मानिनीमानोन्मूलनप्रणाली समाश्रयणीया, किं गार्हस्थ्यसुखम्, के च तत्प्राप्त्युपायाः, इत्येवमाद्योऽवश्यं ज्ञातव्या विषयाः कथं परिज्ञायेरन् ।

अत एव सुष्ठूक्तं केनापि कविवरेण—

किं दाम्पत्यसुखं लोके कानि तत्साधनानि च ।
कुमारी परिणीता तु कीदृशी सुखदा भवेत् ॥
के च विस्रम्भणोपाया स्तासामिह सुखावहाः ।
प्रमदानां कथञ्चापि मदविद्रावणं भवेत् ॥
कथं नष्टोऽनुरागश्च प्रत्यानेयो मनीषिभिः ।
वन्ध्यायां मृतवत्सायां वात्मजाप्तिः कथं भवेत् ॥
सतीनां वनितानाञ्च लक्षणानीह कानि च ।
पुंश्चलीनान्तु नारीणां परिज्ञानं कथं भवेत् ॥
तासां विचेष्टितेभ्यश्च ह्यात्मानं रक्षयेत् कथम् ॥
कथं शरीरं सुरतायामितन्तु विलासिनाम् ।
नवयौवनकालीन-सुरतक्षमतां व्रजेत् ॥

प्रेत्तावद्भिर्भिषग्वर्यैः प्रत्यहं मुपरीक्षिताः ।
गर्भमन्धाग्रणोपायाः के भवेयुः सुखप्रदाः ॥
इत्येवमादयोऽवश्यं ज्ञातव्या विषयाश्च ये ।
तानविज्ञाय मूढात्मा कथं रतिसुखं लभेत ॥
अपिच—

कामशास्त्रपरिज्ञानाभावे न गार्हस्थ्यसुखस्यैव नैराश्यं समापतेत्, प्रत्युत मरणाद्यनिष्टसम्भावन मपि, इति नास्त्यगोचरं तत्रभवतां प्रेक्षावताम्।

यथाह कश्चिद्विपश्चिद्वरः—

रतिशास्त्रपरिज्ञानविमूढा ये नराधमाः ।
रतिं स्वरतिहीनायां विधित्सन्ति गतायुषः ॥ १ ॥
अवश्यं मरणं तेषां भवेदिति विनिश्चितम् ।
अतोऽपि रतिशास्त्रस्य ज्ञानमावश्यकं मतम् ॥ २ ॥

ये च केचिदिदानीन्तना नव्यमभ्यम्मन्या विद्वांस एवंगुणविशिष्टं रतिशास्त्रं दुर्व्यसनादिप्रवृत्तिप्रयोजकत्वरूपेण सन्दूषयन्ति तदविद्याविजृम्भितमेवेति नैतत् पिहितचरं कामकलातत्त्वामृतजुषां विदुषाम्।

सत्यमाह कश्चित् कवीन्द्रः —

पाश्चात्यसभ्यता-क्रूराचारस्यावेशमोहिताः ।
रतिशास्त्ररहस्यान्त- परिज्ञानविवर्जिताः ॥
सत्यप्रचारकम्मन्या विद्वांसो ये हताशयाः ।
दुर्विचार-दुराचार-व्यभिचार-प्रचारकम् ॥

अश्लीलबहुलाधारं त्वधर्मस्य प्रसारकम् ।
कामशास्त्रन्तु मन्यन्ते निर्दोषमपि सर्वथा ॥
नितान्तं गोपनीयञ्च शास्त्रमेतदन स्मृतम् ।
अतः कामागमग्रन्थाः संग्राह्या नैव कर्हिचित् ॥
न श्रोतव्या न द्रष्टव्या नाध्येतव्याः कथञ्चन ।
इत्येवं यत्प्रजल्पन्ति मौर्ख्यप्रलपितन्तु तत् ॥

यच्चास्य शास्त्रस्य धर्मागमविरुद्धपारदारिकाधिकारिकरति प्रवृत्त्युपदेशप्रयोजकतया धर्मबहिष्कृतत्वं प्रख्यापितम्, तदेतच्छास्त्राऽनवलोकनमूलकमेवेति रतिशास्त्रीयतत्तद्ग्रन्थसन्दर्भपर्यालोचनयैव स्फुटीभविष्यति।

यथा च पारदारिकाधिकारे पूर्वाचार्यै स्तद् गर्हणीयत्वं प्रतिपादितम्, तद्वचनां विश्वस्माय दिङ्मात्र मिहोदाह्रियते।

"यथाह कविशेखराचार्यः—

"अश्रद्धा मुपहास्यतां मलिनता मर्थक्षयं लाघवं
गर्हां ग्लानि मधोगतिं विकलता मायुःक्षयं दुर्गतिम् ।
इत्थं य परदारकर्मणिरतो लोकत्रये निन्दितां
विन्दन्ते परमापदः सुखधिया दुःखं नरास्ते सदा ॥"

अपि च यथाह कोकोकः कवीन्द्रः—

असंगृहीतभार्याञ्च ब्रह्मस्त्रो यत्र गच्छति ।
सूतकं सततं तस्य ब्रह्महत्या दिने दिने ॥

अपि च—"अज्ञाता द्विजवल्लभा गुरुवधू मित्राङ्गना रोगिणी
चेटी प्रव्रजिता सती रिपुवधू शिष्या च गर्भान्विता ।

भ्रूणघ्नी मृतसन्ततिः स्वजना चाप्यसवर्णजा गोत्रजा
गन्तव्या न कदापि तत्रपुरुषैरेताः स्त्रियः कामिभिः ॥

इत्यत्र गुरुवधूगमनस्य "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैःसह। इति धर्मशास्त्रप्रदर्शित-महापातकान्तर्गतत्वेन,मित्राङ्गनादिगमनस्य चानुपातकान्तःपातितया, चण्डीगमनादेश्च तत्तत्पातकदोषदूषितत्वेन परिहेयत्वं प्रतिपादतोऽस्य शास्त्रस्य व्यभिचारप्रचारकत्वं कथं कियत्कालश्च स्थास्यतीति सुधी-भिर्व्याकलनीयम्।

अपिच कामशास्त्रे यथा तत्तत्स्थलेषु धर्मशास्त्रप्रदर्शितमार्गस्य अनुसरणमवलम्बितम्, तथैव आयुर्वेदान्तर्गतस्य स्वस्थवृत्तशास्त्र-स्यापीति नात्र सन्देहलेशोऽपि। तथा हि यथाऽत्रैव पूर्वास्मिन् ("आज्ञा ना-" इति) पद्ये रोगिण्यागर्भिण्यश्च रति सन्दूषिता। तद्रतिदूषण-मायुर्वेदीयस्वस्थवृत्तोपदेशानुसन्धानमन्तरा कथङ्कारमुपपद्येत स्मृ-तिपथम्।

तत्सन्दूषणकारणञ्च यथोक्तमायुर्वेदे—

" गर्भिणीरमणेनेह गर्भनाशोऽथवा ध्रुवम्।
गर्भपीडा प्रजायेत तस्मात्तां परिवर्जयेत् ॥

अपिच–

रोगिणी रमणी यस्तु सेवते नष्टमानस ।
बलक्षयो भवेत्तस्य व्याधिभिः स प्रपीड्यते ॥

अपिच–

"नद्यांदेवगृहे चतुष्पथवटे शैलस्य सानौ जले"
(पञ्चसायक-४ २४)

अस्मिन्पथे–

निषिद्धं नदीप्रदेशादिकं सुरतं–"नान्ययोनौ नायोनौ...न रजःस्वलां नातुरां...न चैत्यचत्वरचतुष्पथोपवनश्मशानायतनसलिलौषधिद्विजगुरुसुरालयेषु न सन्ध्ययोर्नाऽऽहसि व्यवायं गच्छेत्' इत्यादिभिर्वचनैरायुर्वेदप्रसिद्धयानादिकोपकारित्वादिहेत्वनुसन्धानपूर्वकमेवेति स्पष्टमेवैतच्छास्त्रस्य आयुर्वेदोपदेशानुगामित्वम्।

यानि चात्र देहशैथिल्याद्यापादकत्वेन आयुर्वेदोपदेशविरुद्धानि करणानि प्रतिपादितानि, तानि किल विलासिभिरेव स्वाध्यायाः स्वस्य च प्रकृतिसत्त्वस्वभावमदनानपत्रकालादिपर्यवेक्षणपूर्वकं मुपास्यमानानि न दोषकराणि" इति करणप्रकरणप्रारम्भ एव समुपदिष्टम्।

अपिच–

"यो भार्यायामृतौ मोहादङ्गनेव प्रवर्तते।
तस्य स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञितः॥
ऋतौ पुरुषवच्चापि प्रवर्तेताङ्गना यदि।
ततः कन्या यदि भवेत् सा भवेन्नरचेष्टिता॥

(सुश्रु० सू० शा० २ अ०)

इत्यादौ आयुर्वेदशास्त्रकारैः महर्षिभिर्विपरीतरतस्य षण्ढत्वादिमहादोषदुष्टतया हेयत्वं यथा ध्वनितम्।

तथात्रापि व्यज्यते यथा–

"अल्पप्रयुक्ता ऋतुयोगयुक्ता गर्भालसा स्थूलतनुर्नताङ्गी।
क्षीणा नवोढा श्रमिता च नारी वर्ज्या रतौ विपरीतबन्धे॥

पद्येनाऽनेन तद्धेतुमन्तरा ऋतुकाले वर्जनीयतया प्रतिपादितस्य विपरीतरतस्य कैमर्थिकोऽयं प्रतिषेधाभिनिवेशोऽस्य शास्त्रस्य स-म्पद्येत।

ये च मूढा अश्लीलबहुलाशास्त्रमस्य शास्त्रस्य मन्यन्ते, तैरिमा-निम्नोक्ता उपदेशोक्तयः सम्यक्परिशीलनीयाः—

ललिता परिणीता तु वनिता सा प्रशस्यते ।
दाम्पत्यसुखपीयूषसन्दोहं या प्रवाहयेत् ॥ १ ॥
कुटीरमपि दीनानां यया च समलंकृतम् ।
इन्द्रमन्दिरसौन्दर्यमहिमानं विडम्बयेत् ॥ २ ॥
प्रशस्ता च रतिःसैव यया तु हृदयस्थया ।
स्यान्ते नितान्तं शान्ति स्याल्लोकद्वयसुखावहा ॥ ३ ॥
विषयाम्भोधिकल्लोलाद् या च जीवनपादपम् ।
विशीर्णमूलं झटिति सर्वं परिकल्पयेत् ॥ ४ ॥
लोके धर्मार्थकामानि राजनीतिश्च प्रत्ययम् ।
समालोक्य प्रवर्तेत संयतो दारसंग्रहे ॥ ५ ॥
रतिशास्त्ररहस्यज्ञ पुरुषार्थत्रयस्थितिम् ।
पालयन् विधिवद्युक्त सुखमक्षय्यमश्नुते ॥ ६ ॥

अस्य च सर्वलोकोपकारकस्य धर्मार्थकामव्यवहारोपदेशक-त्वेन प्राशस्त्यं बहुत्र प्रदर्शितम् पूर्वाचार्यैर्वात्स्यायनादिभिर्महर्षिभिः-तथाहि–

सदेतद्ब्रह्मचर्येण परेण च समाधिना ।
विहितं लोकयात्रायै न रागार्थोऽस्य संविधिः ॥
धर्ममर्थञ्च कामञ्च प्रत्ययं लोकमेव च ।
पश्यत्येतस्य तत्त्वज्ञो न च रागात्प्रवर्तते ॥

किम्बहुना, रतिशास्त्रं सर्वथैव निरवद्यं सर्वजनसुखकरं लोकद्वयाविरुद्धञ्चेति सर्वथा समादरणीयम् ॥

तस्यैतस्य रतिशास्त्रस्य लोकद्वयाविरुद्धं स्वस्त्यनुवृत्तमार्गानुसारिणं सर्वोपकारिणं विषयं सङ्क्षेपेण प्रतिपादयन्तं पञ्चसायकाख्यं ग्रन्थमत्युपयोगिनमितिमत्वा सार्वजनिकसौलभ्याय प्रत्निकाशयिषुभिः "पञ्जाबसंस्कृतपुस्तकालयाऽध्यक्षैः मोतीलालबनारसीदाससमहोदयैः" समभ्यर्थितोऽहं प्राप्तपुस्तकचतुष्टयाऽऽधारेणाऽस्यशोधनकर्मणि प्रावर्तिषि । पुस्तकचयप्रेषकमहोदया डा. श्रीपाद कृष्णबेल्वल्कर महाशयाः शतशो धन्यवादपुरस्सरमभिनन्द्यन्ते ॥

"तेषां नामानि प्राप्तिस्थानानि च यथा--

क संज्ञितम् पूनानगरस्थ डाक्टर भण्डारकर संस्थापित प्राच्यान्वेषणसंस्था संग्रहालयात्प्राप्तम् ।

ख संज्ञितम् ,, ,, ,, ,,

ग संज्ञितम् ,, ,, ,, ,,

घ संज्ञितम् बीकानेरस्थ राजकीय पुस्तकालयात्प्राप्तम्--

अपि च तत्र २ पाठान्तराणि प्रादर्शयम्। आदौ विषयसूचीम्, अकारादिक्रमेण च तत श्लोकसूचीम्, अन्ते च पारिभाषिकशब्दानां सूचीं न्यवेशयम्।

तदेवं सपरिश्रमं कृतेऽपि शोधने शुद्धपुस्तकाभावेन, मदज्ञानेन, अक्षरयोजकादिदोषेण वा जातानि स्खलितानि श्रीमद्भिः प्रकाण्डपण्डितैः भवद्भिः संशोधनीयानि, विलोकनीयानि चास्मदीयविषयग्रह-स्थानि, आकलनीयानि च कलिकलावैलक्षण्यानि –

इति निवेदयति

लाहौर •
१४ १०-७७

विद्वद्वशंवद
[गढवालजनपदान्तर्गत श्रीनगरोपवर्ति—
"खोला" ऽऽख्यग्रामवास्तव्य]
घिलडियालोपाह्व सदानन्द शास्त्री



अथ पञ्चसायकस्य विषयाणामनुक्रमणिका ।

प्रथमःसायकः ।

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
मंगलाचरणम्	१	१
ग्रन्थकर्तुः परिचयप्रदर्शनम्	,,	२
पूर्वाचार्याणामुल्लेखः	२	३
[१] जातिसमुद्देशः	,,	
नायकलक्षणम्	,,	४
पीठमर्दस्य लक्षणम्	,,	५
पद्मिन्याः स्वरूपम्	,,	६
चित्रिण्याः स्वरूपम्	३	७
शङ्खिन्याः स्वरूपम्	,,	८
हस्तिन्याः स्वरूपम्	,,	९
पद्मिन्यादीनां सुरतोचिततिथयः	,,	१०
[२] चन्द्रकलासमुद्देशः	४	
सामान्यचन्द्रकला निरूपणम्	,,	११
प्रकारान्तरेण चन्द्रकलानिरूपणम्	,,	१२
चन्द्रकलादर्शनार्थं केशाकर्षणादिकम्	,,	१३,१४
[३] पद्मिनीचन्द्रकलासमुद्देशः	५	
तिथिभेदेन पद्मिनीवशीकरणविधयः	,,	१५,१६ १७,१८
[४] चित्रिणीचन्द्रकलासमुद्देशः	६	
तिथिभेदेन चित्रिणीवशीकरणविधयः	,,	१९,२० २१,२२
[५] शङ्खिनीचन्द्रकलासमुद्देशः	७	
तिथिभेदेन शङ्खिनीवशीकरणप्रकाराः	,,	२३,२४
[६] हस्तिनीचन्द्रकलासमुद्देशः	८	
तिथिभेदेन हस्तिनीवशीकरणप्रकाराः	,,	२५,२६
पद्मिन्यादीनां सुरतोचितसमयनिरूपणम्	९	२७,२८
[७] सत्त्वसमुद्देशः	१०	
देवसत्त्वायाः स्वरूपम्	,,	२९
गन्धर्वसत्त्वायाः स्वरूपम्	,,	३०
यक्षसत्त्वायाः स्वरूपम्	,,	३१
प्रेतसत्त्वायाः स्वरूपम्	११	३२

द्वितीयःसायकः ,,

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
[१] रतिभेदसमुद्देशः	,,	

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
गुह्यप्रमाणभेदेन नायकनायिकयोर्भेदाः	१९	१
तथाविधनायकनायिकयोः समसुरतकथनम्	,,	२
अत्युच्चादिभेदेन सुरतस्य षड्भेदाः	१०	३,४
तथाविधरतानामुत्तममध्यमाधमत्वनिरूपणम्	,,	५,६
प्रचण्डादिभेदेन सुरतत्रैविध्यम्	,,	७
[२] पुरुषजातिसमुद्देशः	१३	
शशलक्षणम्	,,	८
वृषलक्षणम्	१४	९
अश्वलक्षणम्	,,	१०
[३] स्त्रीजातिसमुद्देशः	,,	
हरिणीलक्षणम्	,,	११
वडवालक्षणम्	१५	१२
करिणीलक्षणम्	,,	१३
[४] वयोलक्षणसमुद्देशः	,,	
अवस्थाभेदेन बालादिस्त्रीनिरूपणम्	,,	१४
तासां स्वभावलक्षणम्	१६	१५
[५] देशविदेशस्त्रीलक्षणसमुद्देशः	,,	
शैलादिनरदेशीयाः	,,	१६
सौराष्ट्रादिदेशीयाः	१६	१७
वङ्गादिदेशीयाः	१७	१८
मध्यदेशीयाः	,,	१९
गौडदेशीयाः	,,	२०
मालवीयाभीलदेशीयाश्च	१८	२१
गुर्जरदेशीयाः	,,	२२
सिन्धुदेशीयाः	,,	२३
कोशलादिप्रभवाः	,,	२४
द्राविडादिदेशीयाः	१९	२५
महाद्रिदेशीयाः	,,	२६
पौण्ड्रादिदेशीयाः	,,	२७
लाटादिदेशीयाः	२०	२८
म्लेच्छदेशीयाः	,,	२९
पार्वतीयाः काश्मीरदेशीयाश्च	,,	,,
चन्द्रकलादिज्ञानस्य फलम्	,,	३०
[६] योनिस्वरूपसमुद्देशः	२१	
योनिचातुर्विध्यम्	,,	३१
योनीनामुत्तममध्यमाधमत्वम्	,,	३२
[७] सामान्यकर्मसमुद्देशः		
स्त्रीणां कामाधिष्ठानम्	,,	३३
स्त्रीणां तृप्तिकरप्रकाराः	२२	३४

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
(८) प्रीतिकारणसमुद्देशः	२२	
नैसर्गिक्याः प्रीतेः स्वरूपम्	,,	३५
विषयजायाः प्रीतेः स्वरूपम्	,,	३६
सादृश्यजायाः प्रीतेः स्वरूपम्	,,	,,
अभ्यासजायाः प्रीतेः स्वरूपम्	,,	३७
[९] रागविनाशसमुद्देशः	,,	
रागविनाशहेतवः	२३	३८
तृतीयः सायकः	,,	
[१] देहदौर्गन्ध्यहरणसमुद्देशः	,,	,,
अङ्गरागस्य प्रयोजनम्	,,	१
गात्रदौर्गन्ध्यहरलेपः	,,	२
घर्मजगात्रदौर्गन्ध्यहरप्रदेहः	,,	३
कक्षादिदौर्गन्ध्यहरप्रलेपः	२४	४
गात्रदौर्गन्ध्यहरप्रलेपः	,,	५
घर्मस्रुतिहरप्रलेपः	,,	६
[२] महापरिमलतैलसमुद्देशः	२५	
महापरिमलतैलविधानम्	,,	७
[३] स्नानीयसुगन्धिसमुद्देशः	,,	
केशमार्दवकरम्	,,	८
अङ्गसौरभकरम्	,,	९
(४) सामान्याङ्गरागसमुद्देशः	२६	
मदनोद्दीपकोऽङ्गरागः	२६	१०
नरमोहनाख्योऽङ्गरागः	,,	११
सुरनरमोहनोऽङ्गरागः	,,	१२
अङ्गसौरभकरः प्रलेपः	२७	१३
(५) सर्वोत्तमगन्धसमुद्देशः	,,	
राजयोग्योऽङ्गरागः	,,	१४
कस्तूरीकलाख्योऽङ्गरागः	,,	१५
गौरव्यगर्भाख्योऽङ्गरागः	२८	१६
(६) मुखवाससमुद्देशः	,,	
मुखवासकारको रसालसारादियोगः	,,	१७
मुखवासकरो गुडत्वगादि योगः	,,	१८
मुखवासकरं कृष्णचूर्णम्	,,	१९
(७) वाजीकरणयोगसमुद्देशः	२९	
वाजीकरणप्रयोजनम्	,,	२०
विदारीचूर्णम्	,,	२१
आमलकचूर्णम्	,,	२२
शतावर्यादिचूर्णम्	३०	२३
यष्ट्याह्वादिमाषयोगः	,,	२४
शाल्मलीबीजप्रयोगः	,,	२५
मार्ष्यादिचूर्णम्	,,	२६
त्रपुशाल्मलिसर्जादिचूर्णम्	३१	२७
गुदशाल्मलिगुल्मचूर्णम्	,,	२८

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
[८] योनिगाढीकरण-समुद्देशः	२१	
योनिगाढीकरणप्रयोजनम्	,,	२६
निशाद्वयादिप्रलेपः	,,	३०
धातक्यादियोगः	३२	३१
बिल्वाजप्रयोगः	,,	३२
इन्द्रगोपप्रयोगः	,,	३३
इन्दीवरादिप्रलेप	,,	३४
मदनफलादिप्रमेह	३३	३५
[९] कामिनीद्रावण समुद्देश		
कामिनीद्रावणप्रयोजनम्	,,	३६
सिन्दूरादिप्रलेप	,,	३७
घोषाचूर्णप्रलेप	३४	३८
टङ्कणचूर्णप्रदेहः	,,	३९
रोध्रादिचूर्णप्रलेपः	,,	४०
बीजपूरमूलप्रलेप	,,	४१
[१०] ध्वजस्थूलीकरण समुद्देश	३५	
पुष्पादिचूर्णन	,,	४२
प्रक्षस्त्यादिचूर्णम्	,,	४३
लोध्रादितैलम्	,,	४४
[११] ध्वजदृढीकरण-समुद्देश	३६	
करवीरादिप्रलेप	,,	४५
[१२] वीर्यस्तम्भन समुद्देशः	,,	
लज्जालुमूलादिप्रयोग	,,	४६
श्वेतशरपुङ्खादिगुटिका	३६	४७
श्वेतशरपुङ्खामूलम्	३७	४८
श्वेतकाकजंघामूलादिप्रलेपः	,,	४९
[१३] तिलकसमुद्देशः	,,	
मञ्जिष्ठादितिलकः	,,	५०
[१४] अञ्जनसमुद्देशः	३८	
अञ्जनप्रयोग	,,	५१
[१५] चूर्णसमुद्देशः	,,	
कुष्ठादिचूर्णम्	,,	५२
(१६) लेपनसमुद्देशः	,,	
वीर्यप्रलेपविधानम्	,,	५३
पतिदासीकरणप्रकारः	३९	५४
सैन्धवादिप्रलेप	,,	५५
भल्लूकमेदादिप्रलेप	,,	५६
गोरोचनादिप्रलेप	,,	५७
[१७] धूपसमुद्देशः	४०	
शुक्रयादि धूपनम्	,,	५८
[१८] काममन्त्र-समुद्देश	,,	
काममन्त्र । तद्ध्यानम्	४० ४१	५९
[१९] चामुण्डामन्त्र समुद्देश	,,	
तन्मन्त्रस्तद्ध्यानञ्च	४१ ४२	५
[२०] विश्वेश्वरीमन्त्र-समुद्देश	,,	
विश्वेश्वरीमन्त्र । तद्ध्यानञ्च ।	,,	६१
[२१] पद्मिनीमन्त्र समुद्देश-	४३	

(विषय)	पृष्ठाङ्काः	श्लोकाङ्काः
पद्मिनीमन्त्रस्तत्साधनप्रकारश्च	४३	(क)
[२२] चित्रिणीमन्त्रसमुद्देशः	,,	
चित्रिणीमन्त्रस्तत्साधनप्रकारश्च	,,	(ख)
[२३] शङ्खिनीमन्त्रसमुद्देशः	४४	
शङ्खिनीमन्त्रस्तत्साधनप्रकारश्च	,,	(ग)
(२४) हस्तिनीमन्त्रसमुद्देश	,,	
हस्तिनीवशीकरणमन्त्रस्तत्साधनप्रकारश्च	,,	(घ)
(२५) अनिच्छाहरणसमुद्देश	४५	
अनिच्छाहरणोपाय	,,	६२
(२६) स्तनोत्थापनसमुद्देश	,,	
मानकटुतैलादिप्रलेप	,	६३
भुजङ्गवसादिलेपनम्	,,	६४
दाडिमतैलादिलेपनम्	,,	६५
(२७) पतितस्तनोत्थापनसमुद्देश	४६	
...लेपनम्	,,	६६
[२८] योनिसंस्कारसमुद्देश	,,	
योनिसङ्कोचनप्रकारः	,,	६७
...चूर्णम्	,,	६८
[२९] रोमशातनसमुद्देश	४७	
भुजङ्गतैलप्रयोग	,,	६९
तालकादिचूर्णम्	,,	७०
शङ्खभस्मप्रयोगः	,,	७१
[३०] स्मरमन्दिरपुष्पसमुद्देश	,,	
ज्योतिष्मतीपत्रप्रयोग	४८	७२
[३१] गर्भधारणसमुद्देश	,,	
अश्वगन्धाद्यौषधिसिद्धदुग्धविधानम्	,,	७३
लक्ष्मणामूलप्रयोग	,,	७४
बीजपूरमूलप्रयोगः	४९	७५
कपित्थादिपाचितदुग्धप्रयोग	,,	७६
[३२] सुखप्रसवमन्त्रसमुद्देशः	,,	
नमः सुखप्रसवमन्त्रः	,,	७७ ७८
अपरमुखप्रसवमन्त्रः	५०	७९
...लेपनम्	,	८०
[३३] सन्ध्याकरणसमुद्देशः	५१	
...लेपनम्	,,	८१
...प्रयोग	,,	८२
...प्रयोगः	,,	८३
[३४] केशसंस्कारसमुद्देशः	,,	
तैलप्रसूनादिप्रलेपः	,,	८४
निम्बतैलप्रयोग	५२	८५
[३५] इन्द्रलुप्तसमुद्देश	,,	
...प्रयोगः	,,	८६

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
[अथ चतुर्थःस्तबकः]	५३	
[१] कन्यालक्षणसमुद्देशः	,,	
विवाहोचितकन्यकानां स्वरूपम्	,,	१-३
[२] कन्यादूषणसमुद्देशः	,,	
त्याज्या कन्यका	,	४-६
[३] वरलक्षणसमुद्देशः	५४	
वरस्य लक्षणम्	,,	७
[४] वरदूषणसमुद्देशः	५५	
त्याज्यवरस्वरूपम्	,,	८
[५] विवाहभेदसमुद्देशः	,,	
विवाहस्याष्टौ भेदाः	,,	९
आर्षविवाहः	,,	१०
दैवविवाहः	५६	११
प्राजापत्यविवाहः	,,	१२
ब्राह्मविवाहः	,	१३
गान्धर्वराक्षसपैशाचविवाहाः	५७	१४
आसुरविवाहः	,,	१५
(६) परदारत्यागसमुद्देशः	,,	
परदाररतौ दूषणानि		१६-१७
(७) दूतीसमुद्देशः	५८	
दशागमदशा	,	१८
परदारगमनोचितः कालः	,	१९
परदारगमने दोषोत्पादनम्	,,	२०
दौत्यकर्मोचिता स्त्रियः	५९	२१
(८) सुलभाख्यासमुद्देशः	,,	
सुलभाः स्त्रियः	,,	२२
(९) कष्टसाध्यासमुद्देशः	५९	
कष्टसाध्याः स्त्रियः	,,	२३
(१०) त्याज्यस्त्रीसमुद्देशः	६०	
त्याज्याः स्त्रियः	,,	२४
(११) सुरतस्थानसमुद्देशः	,,	
त्याज्यस्थानपरिगणनम्	,	२५
ग्राह्यस्थानपरिगणनम्	,,	२६
(१२) अभिलापसमुद्देशः	६१	
अभिलाषव्यञ्जकानि चेष्टितानि	,,	२७
(१३) आलिङ्गनसमुद्देशः	,,	
आलिङ्गनप्रयोजनम्	,,	२८
आलिङ्गनभेदाः	,,	२९
स्पृष्टाभिधम्	,,	३०
लतावेष्टितलक्षणम्	६२	३१
जघनस्वरूपम्	,,	३२
विद्धस्वरूपम्	,,	३३
ऊरूपगूहनलक्षणम्	,,	३४
तिलतण्डुललक्षणम्	६३	३५
क्षीरनीरस्वरूपम्	,,	३६
ललाटिकास्वरूपम्	,	३७
(१४) चुम्बनसमुद्देशः	,	
चुम्बनस्थानानि	,	३८
देशान्तरनागराणां चुम्बनस्थानानि	६४	३९
निमितकलक्षणम्	,,	४०

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
स्फुरिताख्यचुम्बनम्	६४	४१
घृष्टस्वरूपम्	,,	४२
पीडितस्वरूपम्	६५	४३
सम्पुटस्वरूपम्	,,	४४
समौष्ठस्वरूपम्	,,	४५
(१५) नखाघातसमुद्देश	,,	
नखक्षतस्थानानि	,,	४६
छुरितकलक्षणम्	६६	४७
अर्द्धेन्दुसंज्ञकस्वरूपम्	,,	४८
मण्डलस्वरूपम्	,,	४९
शशकप्लुतलक्षणम्	,,	५०
मयूरपादस्वरूपम्	६७	५१
पंकजभञ्जकस्वरूपम्	,,	५२
दर्दुरकस्वरूपम्	,,	५३
नखक्षतानां कामावेशजनकत्वम्	,,	५४
करजक्षतानां कामसर्वस्वम्	,,	५५
(१६) दशनाघातसमुद्देश	,,	
दशनाघातप्रशंसा	६८	५६
दशनाघातस्थानानि	,,	५७
(१७) केशाकर्षणसमुद्देश	,,	
कर्षणोचिताः केशाः	,,	५८
केशाकर्षणप्रकारः	,,	५९
[पञ्चमः सायकः]	६९	
(१) नाडीसमुद्देश	,,	
तिर्यग्भगनाड्यः	,,	१
समीरणाख्या नाडी	,,	२

(विषयाः)	पृष्ठाङ्काः	श्लोकाङ्काः
चान्द्रमसी नाडी	६९	३
गौरीनाडी स्वरूपम्	,,	४
(२) उत्तानबन्धसमुद्देशः	७०	
तत्तद्बन्धाश्रयणे हनुप्रदर्शनम्		५
बन्धविशेषाश्रयणे ज्ञातव्या विषया	,,	६
उत्तानबन्धविधानम्	,,	[illegible]
समपादबन्धविधानम्	७१	८
नागरबन्धविधानम्	,,	९
व्योमपदबन्धविधानम्	,,	१०
त्रैविक्रमबन्धः	,,	११
चाटुकफलुकबन्धः	७२	१२
अवदारितबन्धः	,,	१३
(३) पार्श्वबन्धसमुद्देशः	,,	
उपपातकबन्धस्वरूपम्	,,	१४
सम्पुटबन्धस्वरूपम्	७३	१५
नागबन्धस्वरूपम्	,,	१६
(४) उपविष्टबन्धसमुद्देश	,,	
पद्मासनबन्धस्वरूपम्	,,	१७
शार्मिकबन्धस्वरूपम्	७४	१८
(५) अधोमुखसमुद्देशः	,,	
हारिणबन्धस्वरूपम्	,,	१९
दन्तावलादिबन्धाः		२
(६) ऊर्ध्वबन्धसमुद्देश	७५	
व्यायतरबन्ध	,,	२१
त्रिपादबन्धः	,,	२२

(विषयाः)	पृष्ठाः	श्लोकाः	(विषयाः)	पृष्ठाः	श्लोकाः
(७) पुरुषायितसमुद्देशः	७४		स्वाधीनपतिकायाः स्वरूपम्	७८	२६
विपरीतबन्धस्वरूपम्	,,	२३	उत्कण्ठितायाः स्वरूपम्	,,	३०
विपरीतबन्धस्य प्रस्तावस्य कथनम्	,,	२४	वासकसज्जितायाः स्वरूपम्	,,	३१
विपरीतरतौ रचनायाः क्रिया	७६	२५	कलहान्तरितायाः स्वरूपम्	,,	३२
(८) सीत्कृतादिसमुद्देशः	,,		विप्रलब्धायाः स्वरूपम्	७९	३३
सीत्कृतस्वरूपम्	,,	२०	खण्डितायाः स्वरूपम्	,,	३४
स्तनितस्वरूपम्	७७	२७	अभिसारिकायाः स्वरूपम्	,,	३५
सीत्कृतादिस्वरूपकथनम्	,,	२८	प्रोषितायाः स्वरूपम्	,,	३६
(९) अष्टनायिकासमुद्देशः	७८		उपसंहारः	८०	३७–३८

अकारादि क्रमेण पद्यानामनुक्रमणिका ।

श्लोकाः	पृ.	सा.	श्लो.	श्लोकाः	पृ.	सा.	श्लो.
[अ]				[आ]			
अगस्त्यपत्र	३४	–	३६	आकर्ण्य	८	१	२४
अंगुष्ठ	८	१	११	आक्षिप्य	२२	२	३७
अत्युत्तमः	१३	२	३२	आलोक्य	२	१	४
अधोमुखस्थाम्	७४	४	१८	आचुम्ब्याधर	४	१	१६
अधोमुखी	७४	४	२३	आदायकर्णे	३७	३	४६
अन्योन्यदृशः	७४	४	२१	आदायप्रथम	४७	४	१५
अमलनलिन	१८	२	२३	आदायनिज	२४	३	७
अम्भोजास्या	४३	४	२	आयाम	११	२	१
अरप्रयु	७१	४	२४	आलिङ्ग्य	७	१	२२
अथवाम्	४७	४	१६	आरम्भ	७६	४	३४
अग्निप्रत्यह	१	१	२	आर्यो	४४	४	१६
अज्ञानाद्विज	६०	४	२४	आहृत्याचुम्ब	४६	४	१२
अज्ञानान्यथा	४४	४	६				

श्लोकाः	पृ.सा.श्लो.
(इ)	
इत्यादियोगे	७७ ५ २८
इदममृत	४६ ३ ७८
इन्दीवर	३२ ३ ३४
इहामृतं	५६ ३ ७७
[उ]	
उक्षागच्छति	६१ ४ २७
उत्तानसुप्ताप्रथ	७० ५ ७
उत्तानसुप्तायुव	७१ ५ ८
उशीर कृष्णा	२७ ३ १३
(ऊ)	
ऊरूनटे	६६ ४ ५०
ऊर्ध्वभुजा	६२ ४ ३१
ऊर्ध्वोःपतिः	७३ ५ १५
(ऋ)	
ऋत्विग्भिः	५६ ४ ११
(ए)	
एकं युवत्याश्चरणं	७१ ५ ११
एकं युवत्याहृद	७२ ५ १५
एकावल्लभ	५६ ४ २३
एकेन	६१ ४ ३०
एकोयुवत्या	७५ ५ २२
एभिर्जलं	५० ३ ८०
एलाशटी	२६ ३ ११
एवंविधाया	७१ ५ ६
(ऐ)	
ऐरण्य	२६ ३ १२
(ओ)	
ओष्ठेन	६४ ४ ४५
(क)	
कराङ्कनेनैव	६६ ४ ४८
कनकरुचिर	४१ ३ ५६
कन्यावान्धव	५६ ४ १२
कन्या यौवन	५७ ४ १४
करकुच	१७ २ २०
करतल	१८ २ २१
कर्पद्वयं	५१ ३ ८३
कर्पार्द्धमात्रं	५२ ३ ८५
कशेरु	४६ ३ ७६
कक्षाकुचौ	६५ ४ ४६
कक्षानितम्ब	६६ ४ ४६
कक्षामुल्लासि	७ १ २३
कक्षायुगं	६५ ४ ३६
कान्तस्य वक्षः	७२ ५ १३
कान्तामुखं	६५ ४ ४४
कान्तोऽङ्गनाया	६५ ४ ४०
कान्तो नितम्ब	७४ ५ १८
कान्ता मनोज्ञ	६२ ४ ३४
कामिन्या	५८ ४ १६
कार्य्यं दृणाः	१४ २ १०
किमत्रचित्रम्	३५ ३ ४३

श्लोकाः	पृ०	सा०	श्लो०
कुर्वीतापिर	४	१	१४
कुवलय	१८	२	२७
कुष्ठोत्पलम्	३८	३	४७
क्रोधात्प्रयाति	७८	५	३२
क्षीरेण	३६	३	४६
क्षीरोदनम्	४४	३	६२
(ख)			
खर्या	५३	४	४
(ग)			
गण्डस्थली	६१	४	३८
गाढं संश्लिष्य	२०	२	२८
गाढालिङ्गन	५	१	१४
गात्रोपरिष्टात्	६३	४	३६
गुञ्जाफलैः	५२	३	८६
गुडत्वचेना	२८	१	१८
गुरुकुम्भ	१०	१	३१
गूढग्रन्थि	१६	२	१७
गोरोचना	३६	३	५७
गौरीतिनाडी	६६	४	४
ग्रीवायाम	७	१	२१
(घ)			
घोषारज	३४	३	३८
(च)			
चन्दुलमरल	१०	१	३०
चक्षुःप्रीति	५८	४	१८
चुम्बितालकः	६	१	१६
चूर्णं विदार्याः	२१	१	२१
[ज]			
जाती कर्कट	२७	३	६४
जाती प्रसूनैः	४६	३	६८
ज्योतिष्मती	४८	३	७२
(त)			
तथा नखा	६८	४	५७
तन्व्यङ्गी	३	१	८
तस्यार्भरेण	२२	२	१४
तस्या युवत्या	७०	५	६
तारापीडसुतः	५८	४	१०
तिलप्रसूनं	५१	३	८४
तुरङ्ग गन्धा	४८	३	७३
तुषकण	३४	३	४१
तैलं दृढात्	४५	३	६५
त्रिवलिवलित	१०	१	२६
(द)			
दन्तप्रकारः	६८	४	४६
दन्तायतच्छाग	७४	५	२०
दंष्ट्राकोटि	४२	३	६०
दारिद्र्यदुःख	२३	२	३८
दार्वी	४६	४	११
दीर्घाक्षाः	१३	२	८
दुष्टा दुर्गन्ध	२०	२	२६
दैर्घ्यं महोन्मथ	१८	३	४१
देयान्नं	७६	५	३६
द्रवति यदि	७६	५	३६
दृष्ट्वा मन्मथ	२	१	३
(ध)			
धूर्त ! त्वमेवं	७४	५	२४
ध्यात्वा प्रजातुं	७१	५	१०

श्लोकाः	पृ० सा० श्लो०
(न)	
नद्यां देवगृहे	६० [illegible] २५
नाभ्याम्नतः	२२ २ ३५
निनम्बबिम्बम्	७२ ५ १२
निशाढ्यं	३१ ३ ३०
(प)	
पत्युर्मुखे	६४ ६ ४१
पद्मास्मनं	७३ ५ १७
पथ्याभागचतुष्यं	२७ ३ १५
पथ्याभागचतुष्यं	२८ ३ १६
पथ्या रसाला	२५ ३ ५६
पलाशभस्मा	४७ ३ ७०
पलाशक्षीर	५१ ३ ८१
पापिष्ठो	५५ ६ ८
पार्श्वस्थितायाः	७३ ५ १६
पिकरव	१६ २ २५
पिकशिखि	७७ ५ २६
पिकास्तबीजेन	३० ३ ३२
पीनश्रोणी	७३ ४ ३
पीनास्यलपतनु	३ १ ६
पुंसःशरीरे	६७ ४ ५०
पुलागफला	१८ २ २५
पुष्पदमाभर	५५ ५ ५
पुष्पाङ्गराग	७८ ५ ३०
पुष्पोत्तमं	५८ ६ ७५
पौलस्त्यः	५७ ५ १७
प्रत्यालोऽमल	५५ ५ ७
प्रत्यौति मदनि	५३ ५ १
प्रत्यङ्गवेग	१३ २ [illegible]
प्रधानभूता	६६ ५ [illegible]
प्रसाग्नोस	७० ५ ५
प्रक्षालयेत्	४६ ३ ६५
प्रागङ्गरागः	२२ ३ १
प्रातः	७६ ५ ३४
प्रीतिःसभा	१२ २ ६
प्रौढाकान्त	५६ ४ २२
प्रौढाङ्गनायाः	३१ ३ २६
[फ]	
फलंकदम्बस्य	५१ ३ ८२
[ब]	
बरविहरण	११ १ ३२
बलेन नारी	२६ ३ ३०
बाला नूतन	१६ २ १५
बहाम्येन्दु	४ १ १०
[भ]	
भल्लूकमेदं	३६ ३ ५६
भव्याघना	६८ ४ ५८
भुजङ्गतैलम्	४७ ३ ६६
भूयोविभाव्य	२६ ३ २२
[म]	
मदनकथन	३३ ३ ३५
मध्येन	३८ ३ ५३
मनोभाग्या	६६ ५ १
माञ्जिष्ठ	३७ ३ ५०
मागङ्ग	५५ ३ ६३
मांसीम	३० ३ २६
मुक्ताःपाशाः	५० ३ ७६

श्लोका	पृ	मा	श्लो
मौली कुन्तल	४	१	१३
मृगी चूर्ण	१२	२	३
मृगी हथं	१२	२	५
मृदङ्गी	१४	२	११
(य)			
यः कुष्ठचूर्णम	२८	३	१६
यदान्यद्	३३	३	३६
यद्वाद्दु	६३	४	३५
यस्याः पतिः	७८	५	२६
या चापरा	८६	५	३
या बीजपूर	४६	३	७५
यामिन्याः	६	१	२७
यावच्चन्द्र	८०	५	३७
यावल्लक्ष्मी	८०	५	३८
योषित्तकी	३०	३	२४
(र)			
रतिपरिमल	१	१	१
रम्भाजले	४७	३	७१
रसालजम्बू	२८	३	१७
रुद्राङ्गी	१६	२	१६
रेवायुगम	६७	४	४३
[ल]			
लघुशाल्मलि	३१	३	२७
(व)			
वक्षस्मन:	४२	३	६१
वन्हिर्नशान्ति	२१	२	३३
वनभुजङ्गस्य	५५	३	८५
विचायान	५५	४	१०
विस्रोष्ठं	६	१	१८

श्लोकाः	पृ	मा	श्लो
वृद्धशाल्मलि	३१	३	२८
वृन्तारूढक	६१	४	२६
व्यक्तीकृता	६७	४	४२
व्याहृणाए	८	१	२५
व्यानिम्न	१५	२	१२
[श]			
शतावरी	३०	३	२३
शशकहरिण	११	२	२
शुचिचरित	१७	२	१६
शूर्ङ्गीयचा	४०	३	५८
श्रीपर्णिकायाः	४६	३	६६
श्रोणितटे	६७	४	३२
श्यामा	३	१	७
श्लिष्टाकन्धर	७	१	२०
श्लिष्टागादतरं	६	१	१७
श्वेतपुपुत्राख्य	३६	३	४७
श्वेतपुपुत्राच्च	३७	३	४८
(ष)			
षोडशवर्षा	१५	२	१४
[स]			
सङ्कुचितं	७६	५	३३
संस्थापनं	६६	४	४७
सम्पूर्णेन्दुनिर्षः	६	१	२६
सम्पूर्णेन्दुमुखी	७	१	६
सम्भोग	३६	३	[illegible]४
सम्वेष्टय	६८	४	४८
सकलसुवन	१६	२	२६
सकुष्ठमा	३५	३	५२
संकरागे	२४	२	६

श्लोका.	पृ.	सा	श्ला	श्लोका	पृ	सा	श्लो
सदाडिम	२४	३	४	स्थूलाङ्गी	१४	२	१३
सधानकीपुष्प	३२	३	३१	स्पर्शेन	२१	२	३१
सधातकीलोध्र	२३	३	२	स्फाराक ग	१४	२	६
सरोध्रधत्तूर	३४	३	४०	स्फुर्जद्दीप	६०	४	२६
सलोध्र	३५	३	४४	स्वर्णाम्बुदो	२४	३	८
सर्वस्वमे	६७	४	४४	स्नक्चन्दनाम्बरमनो	२२	२	३६
साचारः	२	१	४	स्नक्चन्दनाम्बरवि	५८	४	३१
सा शक	३२	३	३३	(ह)			
सिन्दूर	३३	३	३७	हयगन्धि	३६	३	४५
सिन्धूत्थ	३६	३	५५	हरीतकीचन्दन	२४	३	३
सितपिक	३०	३	२४	हरीतकीतोय	२६	३	१०
सीमन्तपार्श्वे	६७	४	५१	हरीतकीश्रीफ	३४	३	४
सीमन्ते नयने	४	१	१२	हस्ताङ्गुलि	६५	४	४३
सुखयति	६	१	२८	हस्तेन नेत्रं	६४	४	४२
सुरतरस	१६	२	२७	[ज्ञ]			
स्त्रीपुंसयो	१२	२	५	ज्ञेया.	१७	२	१८
स्थितोपविष्टं	६१	४	३३				

इति पद्यानामनुक्रमणिका ॥

पञ्चसायकस्थपारिभाषिकशब्दानां सूची ।

शब्दा	पृ	सा	श्लो	शब्दा	पृ	सा	श्लो
पद्मिनी	२	१	६	मातङ्गलीलायितम्	,,	१	१४
चित्रिणी	३	१	७	सत्कारः	,,	१	१५
शङ्खिनी	,,	१	९	मायूरपादिचक्रम	६	१	१७
हस्तिनी	,,	१	६	अर्धचन्द्रः	,,	१	१७
सुरतोत्सवः	४	१	१०	कुड्मितम्	,,	१	१७
चन्द्रकला	,,	१	११	स्मरमन्दिरम्	७	१	२१
मनोभवगृहम्	,,	१	१२	कामिकन्दीवायितम्	,,	१	२१
स्फोटा	५	१	१३	सीत्कृतम्	,,	१	२२

शब्दाः	पृ	सा	श्लो
कन्दर्पलिधिः	८	१	२३
कामालयः	,,	१	२४
कामागारम्	८	१	२६
चुम्बलिका	,,	१	२६
मालिनी	,,	१	२७
मातङ्गी	,,	१	२७
द्वितीयःमायकः	११		
शश	१३	२	८
वृषः	१४	२	९
तुरगः	,,	२	१०
उच्चरतम	१२	२	३
नीचरतम	,,	२	३
अत्युच्चरतम्	,,	२	४
अतिनीचरतम्	,,	२	५
समसुरतम्	,,	२	६
प्रचण्डवेगः	१३	२	७
मध्यवेग	,,	२	७
लघुवेगः	,,	२	७
हरिणी	१५	२	१८
तुरङ्गी	,,	२	१८
बाला	१६		
तरुणी	,,		
प्रौढा	,,	२	१५
वृद्धा	,,		
मन्मथमन्दिरम्	३१	३	२६
वराङ्गम	,,	३	२६
कन्दर्पगेहम	१५	२	११
रतगुहा	,,	२	१०
मदनातपत्रम	३१	३	३०

शब्दा	पृ	सा.	श्लो
मनोजगेहम्	३२	३	३२
कुसुमेषुवश्म	,,	३	३३
लताधिरूढम्	६१	४	३०
लतावेष्टितम्	६२	४	३१
आघनम्	,,	४	३२
विद्धकम्	,,	४	३३
ऊरूपगूढकम्	,,	४	३४
तिलतण्डुलम्	६२	४	३५
क्षीरजलम्	,,	३	३६
लालाटिकम्	,,	४	३७
निमित्तम	६४	४	४०
स्फुरितम्	,,	४	४१
घृतम्	,,	४	४२
पीडितम्	६५	४	४३
सम्पुटकम्	,,	४	४४
समौष्टम	,,	४	४५
छुरितकम्	६६	४	४७
अर्द्धेन्दुकम्	,,	४	४८
मण्डलम	,,	४	४९
मयूरपादम	६७	४	५२
पङ्कजपत्रम्	,,	,,	,,
दर्दुरकम	,,	४	५६
भुजङ्गवल्ली	६८	४	५८
मर्मोरमा	६९	५	२
चान्द्रमसी	,,	५	३
गौरी	,,	,,	४
बन्ध	७०	५	६
उत्तानबन्धः	,,	५	७
समपादबन्ध	७१	५	८

शब्दा	पृ. मा. श्लो.
नागरबन्धः	७१ ५ ९
व्योममदबन्धः	,, ५ १०
त्रैविक्रमबन्धः	,, ५ ११
चाटुकफेलुकबन्धः	७२ ५ १२
अवदारितबन्धः	,, ५ १३
उपधीतबन्धः	,, ५ १४
सम्पुटबन्धः	७३ ५ १५
नागबन्धः	,, ५ १६
पद्मासनबन्धः	,, ५ १७
कीर्तिबन्धः	७४ ५ १८
हारिणबन्धः	,, ५ १९
दन्ताधलबन्धः	,, ५ २०
छागबन्धः	,, ,, ,,
तुरङ्गबन्धः	,, ,, ,,
व्यासकरबन्धः	७५ ५ २१
त्रिपादबन्धः	,, ५ २२
विपरीतबन्धः	,, ५ २३
सीत्कृतम्	७७ ५ २६

शब्दा.	पृ. मा. श्लो.
स्तनितम्	७७ ५ २७
स्वाधीनपतिका	७८ ५ २९
उत्कण्ठिता	,, ५ ३०
वासकसज्जिता	,, ५ ३१
कलहान्तरिता	७९ ५ ३२
विप्रलब्धा	,, ५ ३३
खण्डिता	,, ५ ३४
अभिसारिका	,, ५ ३५
प्रोषिता	८० ५ ३६

अवशिष्टाःशब्दाः

शब्दा	पृ. मा. श्लो.
पार्श्वबन्धः	७२ ५
उपविष्टबन्धः	७३ ५
पुरुषायितम्	७५ ५
केलिरङ्गः	७६ ५ २४
करणम्	७५ ५ २२
स्मरागारम्	७३ ५ १६
मनोभवागारमुखम्	८९ ५ १

श्री गणेशाय नमः।

पञ्चसायकः

प्रथमः सायकः

रतिपरिमलसिन्धुः कामिनीकेलिबन्धु-
विहितभुवनमोदः सेव्यमानप्रमोदः।
जयति मकरकेतु मोहनस्यैकहेतु-
विरचितबहुसेवः कामिभिः कामदेवः ॥१॥

"ग्रन्थकर्तुः परिचयप्रदर्शनम्-

अस्ति प्रत्यह मर्थितापहरणे श्रीत्र्यंकदीक्षागुरुः
श्रीकण्ठार्चनतत्परो भुवि चतुष्षष्टेः कलानां निधिः।
संगीतामृतमत्प्रमेयरचना चातुर्य चिन्तामणिः
प्रख्यातः कविशेखरार्चितपदः श्रीज्योतिरीशः कृती ॥२॥

---

(१) "विहितमदनमोदः" इति गपुस्तकस्य पाठः। (२) "श्रीमानेषमहीपति[illegible]गिरि
गुणाराधना[illegible] पूजार[illegible]" इति कपुस्तकस्य पाठः।

"पूर्वाचार्याणा मुल्लेखः-

दृष्ट्वा मन्मथतन्त्र मीश्वरमतं वात्स्यायनीयं मतं
गोणीपुत्रक मूलदेव भणितं बाभ्रव्यवाक्यामृतम् ।
श्रीनन्दीश्वररन्तिदेवभणितं क्षेमेन्द्रविद्यागमं
तेनाऽल्कृप्यत[३] पञ्चसायक इति प्रीतिप्रदः कामिनाम् ॥३॥

[१] "अथ जातिसमुद्देशः-

"तत्र नायकस्य लक्षणम्-

साचारः करुणामयः कृतमति र्वादावदाताशयः
काम्यः कामकलानिधिः सुवचनः स्त्रीणां मतो सुन्दरः ।
आढ्यो नीतिपटुः क्षमीच कुतुकी शूरः कुलीनो युवा
संक्षेपा दिह नायको निगदितः संगीतशिक्षान्वितः ॥४॥

"पीठमर्दस्य लक्षणम्-

आचारे विनये नये च सुकृती तौर्यत्रिकेऽकृत्रिमः[४]
शास्त्रे कौतुकशिल्पनाटकोविदो नानाकलाकौशले ।
ऊहापोह समस्तनर्मघटना भावेङ्गितज्ञः पटुः
मन्त्रज्ञ स्थिरसौहृदः प्रवचनः स्या त्पीठमर्दः सदा ॥५॥

"पद्मिन्याः स्वरूपम्-

सम्पूर्णेन्दु मुखी विलोल नयना पीनस्तनी दाक्षिणा-

---

(३) तेनाक्लृप्यत" इति घपुस्तकीय पाठान्तरम् ।

(४) "कृत्रिमे" इति कपुस्तकीय पाठान्तरम् ॥

मृद्वङ्गी विकचारविन्दसुरभि: श्यामाऽथ गौरद्युति: ।
अल्पाहाररता विलासकुशला हंसस्वना मानिनी
लज्जालु र्गुरुदेवपूजनरता स्या न्नायिका पद्मिनी ॥ ६ ॥

चित्रिण्याः स्वरूपं दर्शयति–

श्यामा पद्ममुखी कुरङ्गनयना चामोदरी वल्लला
संगीतागमवेदिनी वरतनु स्तुङ्गस्तनी शिल्पिनी ।
विद्यालापरता मतङ्गजगति र्मांधन्मयूरस्वना
विज्ञेया कविशेखर प्रणयिनी चित्रस्वना चित्रिणी ॥ ७ ॥

"शङ्खिन्याः स्वरूपं निरूपयति–

तन्वङ्गी कुटिलेक्षणा लघुकुचाऽऽभोगा मदावेशिनी
प्रायो दीर्घकचा स्वभावपिशुना कष्टोपभोग्या रतौ ।
पिङ्गा लोलगतिश्च घर्घरस्वा रक्ताम्बराल्हादिनी
नानास्थाननखप्रदान रमिका सेयं मता शङ्खिनी ॥८॥

"हस्तिन्या स्वरूपम्–

पीना स्वल्पतनु र्भृशं मदगतिः क्रूरा नमत्कन्धरा
स्तोकापिङ्गल कुन्तला पृथुकुचा लज्जाविहीनानना ।
बिम्बोष्ठी बहुभोज्यभोजनरुचिः कष्टैकसाध्या रतौ
गौराङ्गी करिदानगन्धिमदन स्थाना मता हस्तिनी ॥९॥

"पद्मिन्यादीनां नायिकानां सुरतोचिता स्तिथयो निरूप्यन्ते-

ग्लास्येन्दु शराचिसङ्ख्य-तिथयः ख्याता नलिन्या रते
पौलस्त्यास्यरसाष्टभास्कर तिथिप्रीता भवे चित्रिणी ।
रुद्रानङ्ग तुरङ्ग शम्भु तिथिभिः स्या च्छङ्खिनी मोदिता
शेषाः स्युः सुरतोत्सवेषु करिणीजातेः स्त्रियाः प्रीतये॥१०॥

॥ इति जाति समुद्देशः ॥

(२) अथ चन्द्रकलासमुद्देशः—

अथ सर्वसामान्यां चन्द्रकलां निरूपयति

अङ्गुष्ठे चरणे च गुल्फ-वलये जानुद्वये जङ्घयोः
नाभौ वक्षसि कक्षयो निंगदित-कण्ठेकपोलाधरे ।
नेत्रे कर्ण युगे ललाटफलके मौलौ च वामभ्रुवा
मूर्ध्वाध श्चलनक्रमेण कथिता श्चान्द्रीकलाः पक्षयोः ॥११॥

अथ प्रकारान्तरेण चन्द्रकला निरूपणम्—

सीमन्ते नयनेऽधरे च गलके कक्षातटे चूचुके
नाभौ श्रोणितटे मनोभवगृहे जङ्घातटे पिण्डके ।
गुल्फे पादतले तदङ्गुलितलेऽङ्गुष्ठे च तिष्ठत्यसौ
वृद्धिक्षीणतया समं शशिकलालीलाकरो योषिताम् ॥१२॥

अथ चन्द्रकलादीपनार्थं

"तत्तदङ्गेषु किं किं कार्यमिति निरूपयति—

मौलौ कुन्तलकर्षणं नयनयो राचुम्बनं गण्डयो-

(१) "रत्नानाग" इति ख पुस्तके लिखितम् ।
(२) "चाहुके" इति ग पुस्तकीय पाठान्तरम् ।

दन्तेनाधरपीडनञ्च सुमहत् स्फोटोञ्च नाम्नां शनैः ॥
कचाकण्ठ कपोल मण्डल कच श्रेणीषु देया नरवाः
सीमन्ते लिखनं करे रुरमिजौ गृहीत गाढं ततः ॥१३॥
कुर्यातविरतं मनोभवगृहे मातङ्गलीलायितं—
जान्वङ्गुष्ठ पदोरु गुल्फ कलनं चाऽन्योन्यतः कामिनोः ।
इत्येवं कथितः प्रदेशकलनादिन्दोः कलादीपनं
कर्तव्यश्च नरे-र्न विस्तरभया दृष्टः प्रपञ्चोऽखिलः ॥१४॥

॥ इति चन्द्रकला समुद्देशः ॥

अथ पद्मिनीचन्द्रकलासमुद्देशः—

गाढालिङ्गन पूर्वकं कररुह रालिख्य जङ्घा स्थलीं
दत्वाथ(१) नराञ्नितम्बफलके पार्श्वेच पृष्ठोदरे ।
सीत्काकारध्वनि जागरूक पुलका माद्ये दिने पद्मिनी
मित्थं चन्द्रकलाविद- स्ववशतां कामानयेयु स्त्रियम् ॥१५॥

अथ द्वितीयायां तिथौ पद्मिन्या वशीकरण प्रकारं निरुपयति—

आचुम्ब्याऽधरपल्लवं स्तनमुगे नखालिके पार्श्वयोः
मूर्द्धान्ते जघनस्थलोरुफलके कृत्वा नखालेखनम् ।

(१) दन्तौष्ठं परिष्ठ मित्यर्थः ।
"तुदाय" इति पाठान्तरम् । (२) आद्ये दिने प्रतिपत्तिथाविति भाव ।
(३) "कामिनीमपि" इति पपुस्तकांयं पाठान्तरम् ।

मर्पन्तो नखरैः पदाम्बुजयुगं कृत्वा कुरङ्गीदृशं
संसेव्याविरतं प्रबुद्धमदनां कुर्युः द्वितीयादिने ॥१६॥

"अथ चतुर्थ्यां तिथौ वशीकरणोपायं दर्शयति

"श्लिष्ट्वा गाढतरं निपीड्य च कुचौ पीत्वा च दन्तच्छदं
वामोरौ करजक्षतं भुजलता मूले विशेषात्पुनः।
मायूराङ्किकमर्द्धचन्द्रच्छुरित प्रायान् नखानादरात्
दद्यु र्बाह्यरतोपचारचतुराः प्राय श्चतुर्थ्यां तिथौ ॥१७॥

"पञ्चम्यां तिथौ पद्मिन्याःसद्यः द्रावणोपायं दर्शयति

"विम्बोष्ठं परिचुम्ब्य दक्षिणकरेणाऽऽकृष्य केशोच्चयं
स्वच्छन्देन विमृश्य चूचुकयुगं चुम्बन् प्रियां भावयेत् ॥
आमृश्यात्करजैः सखेलपुलकं भूयो नितम्बस्थलीं
पञ्चम्यां द्रवतां नयेत्कमलिनी मित्याह वात्स्यायन. ॥१८॥

इति पद्मिनी चन्द्रकलासमुद्देशः ॥

"अथ चित्रिणी चन्द्रकला समुद्देशः—

दशम्यां तिथौ चित्रिण्या वशीकरणोपायं निरूपयति

"चुम्बित्वालक मुन्मदः कररुहै रालिख्य वक्षोजकं
श्रोणी पृष्ठ भुजादिकर्ण जघन स्त्यानोरुयुग्मस्थलीम्।
पाणिभ्यामुपगूहयन् स्मरमणीं कान्तो दशम्यां तिथौ
कन्दर्पं प्रतिबोध्य चन्द्रकलया कुर्यान्निजां चित्रिणीम् ॥१६॥

(१) "सघोरू" इति गपुस्तके लिखितम्। (२) "भुजास्य" इति गपुस्तके दृश्यते।

"षष्ठ्यां तिथौ चित्रिण्या द्रावणोपायं प्रदर्शयति

श्लिष्ट्वा कन्धरकन्दलीं भुजलतापाशेन गाढं ततः
पायं पाय मजस्र मुत्पलदृशां वक्त्रारविन्दामृतम् ।
नाभीकण्ठनितम्ब मंगमलय व्यापार पारंगमः
षष्ठ्यां चन्द्रकलाकलापनिपुणै र्देया नखाःसर्वतः ॥२०॥

अष्टम्यां तिथौ चित्रिण्या द्रावणविधिं निरूपयति

"ग्रीवायां परिरभ्य गाढ मसकृन्नाभिं नखै रालिखन्
दन्तोष्ठं परिपीडयन कुचतटीं चुम्ब न्मनाक् ताडयेत ॥
मानन्दं स्मरमन्दिरे करिकरक्रीडायितं कुर्वता
नेतव्या तरुणी स्वकीयवशतां चण्डी तिथौ कामिनी॥२१॥

"सप्तम्यां तिथौ चित्रिण्या वशीकरणोपायं दर्शयाति

आलिङ्ग्य प्रसभं कपोलनयनश्रोणिश्रुतीश्चम्बयेत्
स्थानेष्वेषु नखप्रदान कुशलो दत्वा नखान्निर्दयम् ।
दष्ट्वा चाधरपल्लवं कुचयुगञ्चा कृष्य केशान् दृशो
रुन्मेषं विदधीत मीत्कृतजुषो भानोस्तिथौ नायकः ॥२२॥

इति चित्रिणी चन्द्रकला समुद्देशः ॥

'अथ शंखिनी चन्द्रकला समुद्देशः—

विष्णुतिथौ शांखिन्या वशीकरणोपायमाह—

कंठा मुद्गमितं विलिख्य करजै रालिङ्ग्य दोर्भ्यां मुहु

---

(१) मास्या मिनि च पुस्तके न पुस्तके च दृश्यते ।

गात्रे श्चोरसिजौ निपीड्य सुतरां विष्णो स्तिथौ चन्द्रवित् ।

"त्रयोदश्यां तिथौ तस्या द्रावणोपायं निरूपयति

आचुम्ब्येच कपोलकण्ठगलके मृद्नन्नुरोजद्वयं
कन्दर्पस्य तिथौ नखक्षतवशात् प्राक् शङ्खिनीं द्रावयेत् ॥२३॥

भानुतिथौ शंखिन्या वशीकरणोपायं निरूपयति

व्यादष्टोष्ठपुट· कपोलनयनं श्रोत्रं नखै रालिखेत्
सान्द्रानन्द निगूढ कण्ठ वलयं भानोस्तिथौ भामिनीम् ।

चतुर्द्दश्यां तिथौ तस्या द्रावणोपायं दर्शयति

आघातं नखरैश्च तत्र चरण ग्रीवाकुचोर· स्थले
कृत्वाऽऽलिख्य च भूतनाथदिवसे कुर्यात्सुधी विह्वलाम् ।२४।

इति शंखिनी चन्द्रकला समुद्देशः ॥

"अथ हस्तिनी चन्द्रकला समुद्देशः

'गिरिजा तिथौ हस्तिन्या वशीकरणोपायं दर्शयति

"आकण्ठं परिरभ्य दोर्लतिकया निष्पीय वक्त्राम्बुजं
कक्षाश्च स्तनमण्डलोदरतटीं चञ्चन्नखै रामृशन्
चोणी भृत्तनयातिथा वथ मुहु कामालयं संस्पृशन्
संस्पृश्या धर पल्लवं ग्रह तिथौ कुर्याद् द्रुतां हस्तिनीम् ॥२५॥

---

(१) गृहार्मिनि क पुस्तके लिखितम् ।

(२) "सेवेत् ,, ग संज्ञक पुस्तकस्य पाठ । (३) "विह ,, इति क पुस्तके लिखितम्

पूर्णमास्याममावस्यां च तिथौ हस्तिन्या द्रावणोपायं प्रदर्शयति—

मम्पूर्णेन्दुतिथौ परिच्छगदिने तस्यैव तुल्या तिथि
स्तस्या मेव वशीकृता शशिकलासम्बोधनैः कामिनी।
कामागारचुचुलिकासु करजैर्दन्तैश्च दन्तच्छदे
गण्डेलेपे परिचुम्बनैश्च विविधैरित्याह नन्दीश्वरः ॥ २६ ॥

इति हस्तिनीचन्द्रकला समुद्देशः ॥

इति चन्द्रकलासमुद्देशः ॥

पद्मिन्यादीनां नायिकानां सुरतोचितसमय मपवर्णयति ।

"कामिन्याः कथित श्चतुर्थचरणःकालो नलिन्या रते
प्रारम्भप्रहरे प्रयाति सुगितां चित्राप्रियां चित्रिणीम्।
शङ्खिन्याः समुदीरितः कविवरै र्याम स्तृतीयो मतो
मातङ्गी द्रवतामुपैति सुरतं नक्तंदिनस्यार्द्धयोः ॥ २७ ॥

"पद्मिन्या रात्रिसुरत मकिञ्चित्करमिति दर्शयति ।

सुरयति न पुमांसं पद्मिनी क्वापि रात्रौ,
निधुवनमिति तस्यां नैव किञ्चित् प्रयोज्यम्।

शिशुरपि यदि कान्तां वासरे ता मुपेयात्,
विकसति रवियोगात् सा हठात्पद्मिनीव ॥ २८ ॥

अथेदानीं बाभ्रव्यमूलदेवयो र्मतान्तर मत्राभिधीयते।

"सत्वसमुद्देशः[1] ।

देवसत्वाया लक्षणम् ।

त्रिवलिवलितमध्या कम्बुकण्ठी विदग्धा,
कमलसुरभिदेहा केतकीगर्भभव्या ।
शुचिचरितविचित्रा शीलसन्तोषयुक्ता,
सुललितपिकवाणी स्यादियं देवसत्वा ॥ २९ ॥

गन्धर्वसत्वायाः स्वरूपं निरूपयति ।

चटुलचपलदृष्टि र्नृत्यगीतादिदक्षा,
जनितविविधतुष्टि र्गन्धमाल्यानुरक्ता ।
शिशिरसुरभिमासक्रीडनप्रेमपात्री,
भवति रुचिरमूर्तिः सैव गन्धर्वसत्वा ॥ ३० ॥

यक्षसत्वाया लक्षणम् ।

गुरुकुचयुगभारा गौरदेहाऽतिदेहा
तरुणहरिणनेत्रा कोपना वीतलज्जा ।
विविधमधुरभोज्या मत्स्यमांसानुरक्ता,
मुनिभिरियमलभ्या यक्षसत्वा प्रदिष्टा ॥ ३१ ॥

---

(१) क सञ्ज्ञक पुस्तके ग सञ्ज्ञक पुस्तके च सत्वसमुद्देशो न पठ्यते ॥

प्रेतसत्वायाः स्वरूपम् ।

वरविहरणविज्ञा रात्रिसञ्चारधीरा,

मलिनपिशुनचित्ता कुत्सिताहारचेष्टा ।

विकृतवदनचन्द्रा कृष्णवर्णाऽतिखर्वा,

मलिनवसनरक्ता कीर्तिता प्रेतसत्वा ॥ ३२ ॥

इति सत्वसमुद्देशः ॥

इति कविशेखर ज्योतीरश्वराचार्य विरचिते पञ्चसायके

जात्यादि निरूपणो नाम प्रथमः सायकः ॥

"अथद्वितीयःसायकः ।

अथ रतिभेदसमुद्देशः

अथ गुह्यप्रमाणभेदेन नायकनायिकयो र्भेदप्रदर्शकं

वात्स्यायनीयं मत मवतारयति

"आयामैः परिणाहकैश्च पुरुषा लिङ्गै र्वराङ्गैः स्त्रियः

शौतव्यास्तु रमग्रहारण ससंख्याताङ्गुलैः सर्वतः ।

जात्यातेऽपि शशा वृषाश्च तुरगाः प्रोक्ताःस्मृतास्ताः परं,

मृगयश्वाकरिणीति विस्तरभयात् संक्षिप्य निष्कृष्यते ॥१॥

अथ नायकनायिकयोः समसुरत माह ।

शशकहरिणपत्न्यो गोतुरङ्गश्च स्तथैव

हयगजपतिपत्न्यो रेकरूपं रतं स्यात् ।

---

(१) "[illegible]" इति [illegible] (२) "[illegible]" इति [illegible]

[illegible]

इह भवति नितांतं प्रीति रन्योन्ययोगात्
अपरमण मशक्यं स्त्री कथं स्वीकरोति ॥ २ ॥

उच्चादिस्वरूपेण सुरतस्य षड् भेदान् दर्शयति।

तत्र उच्चरतस्य नीचरतस्य च भेदद्वयं निरूपयति।

मृगी वृषश्चेत् वृषभी तुरङ्ग मेतद्द्वयं तूच्चरतं वदन्ति।
अश्वा शशं गोःकरिणीश्ववैतन्नीचद्वयं तुष्टिकरं न यूनोः ॥३॥

अत्युच्चातिनीचरतयोः स्वरूपं दर्शयति ।

मृगी हयं हस्तिवधू शशञ्चेदत्युच्चनीचं सुरतं वदन्ति।
प्राणप्रभेदेऽपि न च द्रवन्ति तस्मिन्न तृप्यन्ति नितम्बवत्यः॥४॥

रताना मुत्तममध्यमाधमत्वं निरूपयति ।

स्त्रीपुंसयोः साम्यतरं प्रशस्तं मध्यद्वयं मध्यममामनन्ति ।
अत्युच्चकं वाप्यतिनीचकम्वा निन्द्यं रतज्ञैः सुरतं प्रदिष्टम् ॥५॥

रतानां प्रीतिजनकत्वादिकं वर्णयति ।

प्रीतिः समा स्यात् सुरते समाख्ये-
नीचद्वये योषित एव तुष्टिः ।
अत्युच्चकं स्त्यतिनीचकं वा
तुष्टि र्न यूनां नच सुन्दरीणाम् ॥ ६ ॥

इदानीं प्रचण्डादिभेदेन सुरतस्य त्रैविध्यं दर्शयति।

---

[१] अपरमण मशक्य इति क पुस्तके दृश्यते ॥

(२) "अत्युच्च मेतद् द्वितयं वदन्ति" इति कगंअकपुस्तके, मपुस्तके च दृश्यते

(३) अस्य पद्यस्य पूर्वोभागः ग पुस्तके न दृश्यते ।

प्रचण्डवेग स्त्वथ मध्यवेगस्तथापरः स्याल्लघुनामधेयः ।
पुंस स्तरुण्या उभयोरपीह त्रिधा कवीन्द्राः सुरतं वदन्ति ॥७॥

इति रतिभेदसमुद्देशः–

अथ पुरुषजातिसमुद्देश –

तत्रादौ शशजातीयकानां नायकानां स्वरूपं निरूपयति–

दीर्घाक्षाः सूक्ष्मदेहा लघुसमदशना लम्बकर्णाः सुवाचो
ग्रीवायां जानुदेशे करचरणतले कालिमानं वहन्तः ।
अल्पाहाराः सुशीला दिनमधिशयिनः कान्तिमन्तो धनाढ्याः
क्रीडावन्तो विनीता लघुतरसुरताः पुण्यभाजः शशाःस्युः ॥८॥

अथ मृगजातीयकानां नायकानां स्वरूपंवर्णयति

सुचारुकेशो मृदुवाक् सुवेशः
सुदीर्घकण्ठ श्चपल: सुनेत्र: ।

---

(१) कोकोकविविरचिते रतिरहस्ये तु प्रचण्डादिवेगेन नवधारत मित्युक्तम् यथा—"मन्दमध्यमचण्डा· स्युर्वेगेन उभयं तथा । वेगः कामुकता ज्ञेयस्तेनाऽपि नवधा रतम् " इति ॥ अस्यायमाशयः -

मन्दवेगयोर्यूनो. सङ्गम एकं रतम । मध्यवेगयो यूनोः सङ्गमेऽप्येकंरतम् । प्रचण्डवेगयो यूनो सङ्गमेऽप्येकंरतम । एवं त्रीणि रतानि । मन्दवेगयायुवत्या सह मध्यवेगस्य यूनः सङ्गमे चैकं रतम । मध्यमवेगया युवत्या मन्दवेगस्य यून सङ्गमेऽप्येक रतम । एवं पञ्चरतानि । मन्दवेगयाऽङ्गनया चण्डवेगस्य नरस्य सङ्गमे चैकं रतम । मध्यवेगयाऽङ्गनया चण्डवेगस्य नरस्य सङ्गमे चैकं रतम । चण्डवेगयाऽङ्गनयामध्यवेगस्य पुरुषस्य सङ्गमेचैकरतम । चण्डवेगया युवत्या सह मंदवेगस्य पुरुषस्य सङ्गमे चैकं रतम, इति पूर्वेषां गणनया नवधा रतमिति ॥

(२) करकमल इति क पुस्तके लिखितम ।

(३) इदं पद ख पुस्तके न लिखितम ।

सुरक्तपाणिः समदन्तपङ्क्तिः
सौभाग्ययुक्तः कथितो मृगोऽयम् ॥

अथ वृषभजातीयकानां नायकानां लक्षणं प्रतिजानीते—

"स्फारकाराः मदर्पाः सुरतरमकलालम्पटाः सुन्दराङ्गाः
व्यूढोरस्काः सुरूपाः सुसमजठरिणो मांसला लोलनेत्राः।
अत्यन्तप्रौढवाक्या परिलघुधृतयः क्रोधना मध्यवेगा
उच्चाणो लिङ्ग मीपंढितततनवमितं रङ्गुलीकैर्वहन्ति ॥ ६ ॥

अश्वजातीयकानां नायकानां स्वरूपं निरूपयाति—

कार्ये हृष्टा बलिष्ठाः सितसमदशनाः पीवरास्फोरवक्त्रा
ग्रीवाबाहूरुदीर्घाः परहितनिरताः सात्विकाः स्निग्धवाचः।
निर्लज्जाश्चारुशीलाः पृथुतरगतयश्चण्डसम्भोगरक्ता
अश्वा लिङ्गं वहन्तो युवतिजनरता भानुसङ्ख्याङ्गुलीकम्॥१०॥

इति पुरुषजातिसमुद्देशः॥

अथ स्त्रीजातिसमुद्देशः—

तत्र हरिणी जातीयकानां स्त्रीणां स्वरूपं निरूपयाति

मृदङ्गी दीर्घनेत्रा वरबिसलतिकाकोमला दीर्घबाहुः

(१) अत्यन्तप्रौढवाक्या इति क पुस्तके ग पुस्तके च लिखितम्
(२) इत्यादगुणनवमितं इति पाठान्तर गपुस्तके दृश्यते।
(३) "वानरा व्याघ्राः" इति ग पुस्तकीये पाठान्तरम्।

शोणाम्भोजाभिरामं वहति करयुगं चोदिमध्या सुकेशी ।
सुश्रोणिः कम्बुकण्ठी पृथुकुचयुगला यावहस्तयङ्गुलीकैः
पद्मभिः कन्दर्पगेहं कथयति हरिणीं ता मिह ज्योतिरीश ॥११॥

अथ वडवाजातीयकानां स्त्रीणां स्वरूपं निरूपयन्ति

व्यानिम्नोत्तुङ्गशीर्षा बहुतरकपिशस्थूलकेशप्रचारा
चञ्चन्नीलाम्बुजाक्षी सुललितवदना तुङ्गवक्षोजभागे ।
गम्भीरावर्तनाभिर्वलिभि रुपगता श्रोणिभागलमाङ्गी
. मेयं रन्ध्राङ्गुलीकं वहति स्तगुहारन्ध्रकं वै तुरङ्गी ॥ १२ ॥

अथ हस्तिनीजातीयकानां नायिकानां स्वरूपं दर्शयति

"स्थूलाङ्गी स्थूलगण्डा लघुतरनयना स्थूलनीलाल्पकेशा
बिम्बोष्ठी पीनबाहुः कठिनगुरुकुचा हीनपर्वातिदुष्टा ।
निर्लज्जा रामभोक्ति स्खलितवदना सर्वदा कष्टमाध्या
निर्दिष्टा हस्तिनीयं वहति गविमर्षं स्थूलैर्गुह्यदेशम् ॥ १३ ॥

इति स्त्रीजातिसमुद्देशः ॥

अथ स्त्रीणां वयोलक्षणसमुद्देशः—

अवस्थाभेदेन नायिकानां बालादिसंज्ञात्वं निरूपयति

षोडशवर्षां बालामित्यालपन्ति धीमन्तः ।
त्रिंशत्यब्दा तरुणी त्रिंशात्प्रौढा ततः परं वृद्धा ॥ १४ ॥

(१) "[illegible] पुस्तके [illegible] पुस्तके [illegible] ।

(२) [illegible] पुस्तके [illegible] ।"

अथ तासां स्वभावलक्षण मुपदिशति ।

"बाला नूतनसङ्गमे रतिकरी सान्द्रान्धकारे भवे
दालोके सुख मातनोति तरुणी सम्भोगलीलाविधौ ।
आलोकेऽपि सुखायते सरभसं प्रौढ़ा तमिस्त्रेऽङ्गना
वृद्धा जीवितहारिणी न कुरुते कुत्रापि मौख्यं मनाक् ॥१५॥

इति वयोलक्षणसमुद्देशः ॥

"अथ देशविशेषलक्षणसमुद्देशः

"अथ देशभेदेन स्त्रीणां स्वरूपं निरूप्यते—

"रूक्षाङ्गी बहुवादिनी चलमतिर्गीतप्रिया वालला
शैलाम्भोनिधिपार्श्वदेशवनिता प्रायो भवेदीदृशी ।
वर्षायां कुसुमाकरे च बहुशः सेव्या पुनः प्रीतिदा
गुर्वाहारसुगन्धमाल्यवसनस्निग्धाङ्गरागादिभिः ॥१७॥

अथ सौराष्ट्रकलिङ्गदेशप्रभवाणां स्त्रीणां स्वरूपं-निरुपयति—

"गूढग्रन्थि रहर्निशं हि सकले गात्रे वहत्यच्छ्रता
सम्भोजप्रभवाऽरुणोत्पलकरा शीतालये प्रेयसी ॥
सौराष्ट्री च कलिङ्गदेशयुवतिः कामं भवेत् पित्तला

---

(१) बहुर्वादिनी " इति पुस्तकीय पाठान्तरम् । (२) "शीतप्रिया" इति पुस्तके लिखितम् । (३) "सम्भोगागमपुष्पगानसमये" इति पुस्तकीयं पाठान्तरम् । (४) "सम्भोगसमय" इति पुस्तकीयं पाठान्तरम् ।

हेमन्ते शिशिरे नरैरनुदिनं सेव्या यथाकाङ्क्षया ॥१७॥

"अथ वङ्गादिदेशप्रभवाणां स्त्रीणां लक्षणं लक्षयति–

[१]ज्ञेया कोकिलकाकलीकलरवा मेधस्विनी शीतला
निद्रालुश्च शिरीषकोमलतनु स्निग्धानना श्लेष्मला ।
वंगश्रीहट्टकामरूपतरुणी शीतादिकाले विना
गन्तव्या शरदि प्रकृष्टमदना ग्रीष्मे नरैं रहता ॥१८॥

"अथ मध्यदेशीयानां स्त्रीणां स्वरूपं निरूपयति

शुचिचरितविचित्रा चित्रसम्भोगमित्रा
नरवदशनविरक्ता शिल्पशिक्षानुरक्ता ।
[२]स्थिरमतिनिजवन्धुः कामसर्वस्वसिंधु
[३]भवति रुचिरवेशा कामिनी मध्यदेशा ॥१९॥

अथ गौडदेशीयस्त्रीणां लक्षणं दर्शयति

करकुचकरजाताश्लेषविन्यासदक्षा
सकलसुरतसिन्धु ज्ञानवैराग्यदक्षा ।

---

(१) "शीतादिना मन्त्री ,, इति ग पुस्तके दृश्यते ॥

(२) "स्थिरमतिनिज बन्धु " इति कपुस्तकीय पाठ ॥

(३) मृदुवचनविभागा कामनानगरागा
विगतरमणभीति कोकिलालापगीति ।
द्रवति झटिति कान्ता चित्रसम्भोगशान्ता
रमयति किल कौली कार्तिना वग गौडी ॥

"करकुच"–इति पद्यस्यान्ते कमङ्गकपुस्तके गगङ्गकपुस्तके पद्यमेतदधिकं पठ्यते ।

न लघुं न बहुवेगा प्रायशः कामरक्ता
रमयति मधुराल्पं सुन्दरी हन्त गौडी ॥२०॥

"अथ मालव चोलदेशीयाङ्गनानां स्वरूपं दर्शयति

"करतलहतितुष्टा बाह्यसम्भोगहृष्टा
चिरनिधुवनसाध्या मालवी धूर्त्तवाक्या ।
सुखयति सुखवेगा व्यञ्जितानङ्गरागा
चपलपिशुनलोला स्यादियं चोलबाला ॥२१॥

"अथगुर्जरदेशीयानां स्त्रीणां स्वरूपं दर्शयति

"कुवलयदलवर्णा चारुनाटङ्ककर्णा
चकितहरिणनेत्रा फुल्लराजीववक्त्रा ।
लघुनिधुवनरक्ता कष्टसम्भोगसक्ता
सुललितगतिरेषा गुर्जरी चारुवेषा ॥२२॥

अथ सिन्धुदेशीयस्त्रीणां लक्षणं प्रतिपादयति

"अमलवलितदृष्टिः दिव्यरूपाङ्गयष्टिः
कठिनमदनवेगा दुःखसाध्या प्रयोगे ।
विरमति सुरतान्ते कोपमायाति कान्ते
विविधपुरुषलोला सैन्धवी दुष्टशीला ॥२३॥

अथ कौशलावन्तिकान्ध्रदेशीयानां स्त्रीणां स्वरूपं दर्शयति

"पुलककरजधात्री दुष्टवाक्याभिधात्री

---

(१) "रमयति [illegible] कामिनी [illegible]" इति पुस्तकेषु ग पाठः ॥
(२) "अनङ्गशान्तिः"—इति ग पुस्तके दृश्यते। (३) "दुःखसाध्या प्रयोगा" इति क पुस्तकेऽयं पाठान्तरम्। (४) "सिन्धुजा" इति क पुस्तके लिखितम् ॥

"अथ लाटकर्णाटदेशीयानां स्त्रीणां स्वरूपं वर्णयति

"गाढं संश्लिष्य कण्ठे लिखति कररुहैः सर्वतः कान्तदेहं
केशेष्वाकृष्य चुम्बत्यधर मविरतं मुष्टिघातं ददाति ।
तृप्तिं नो याति शीघ्रं द्रवति नच रते चण्डवेगप्रगल्भा
ज्ञातव्याः पण्डितेन्द्रैः रतिललितरति र्लाटकर्णाटनारी ॥२॥

अथ पूर्वार्द्धेन म्लेच्छाङ्गनानां पार्वतीयानाञ्चो त्तरार्द्धेन काश्मीरादिदेशीयानाञ्च स्त्रीणां स्वरूपं निर्दिशति

"दुष्टा दुर्गन्धदेहा पशुसमसुरता श्चुम्बनाश्लेषहीनाः
सेर्ष्या म्लेच्छाङ्गना स्यु र्लघुरतनिरताः पार्वतीयाश्च नार्यः
काश्मीराभीरमध्या सकलरसकलामोदहन्त्री नितान्तं
साध्या देशानुसारादिहपटुमतिभि र्योषितः सर्वदैव ॥२६॥

"अथ शशिकलाबोधनजातितत्वादि ज्ञानस्य फलं दर्शयति—

"जाते स्त्वं समस्तं निखिलशशिकलाबोधनं सत्वशुद्धिं
मृग्यादीनां वशित्वं मदनरसकलाकौतुकञ्चाप्यशेषम् ।
इत्थं यः कामिनीनां कलयति चरितं देशमात्म्येन सम्यक्

(१) केशाश्लेषनसंप्रताण्मा इति ॥ पुस्तकाय पाठा तरम् ।
(२) म्लेच्छाङ्गना स्यु इति ष पुस्तकाद पाठा नरम् ।
(३) काश्मीराभीरमध्या इति ग पुस्तकाय पाठान्तरम् । तत्र न समार्चीनाता* इति भाति ॥

यावत्तावत्न तस्याः प्रभवति हृदये प्राणनाथः सुखाय ॥२०॥

इति देशविशेषस्त्रीलक्षणसमुद्देशः।

"अथ योनिस्वरूपसमुद्देशः—

"अथ योने श्चातुर्विध्यं निरूपयति—

"स्पर्शेन पङ्कजसमस्तरुणीजनाना
मभ्यन्तरे च गुटिकासमं एव कोपि।
योनि र्भवेदथ वलिप्रकरावकीर्णा
गोजिह्विकासुखदकर्कशगर्भदेशा ॥२१॥

"अथ योनीना मुत्तममध्यमाधमत्वं दर्शयति—

अत्युत्तमः प्रकथितः प्रथमः कवीन्द्रै
मध्यश्च मध्यमविधः किल सम्प्रदिष्टः।
शेषद्वयं मदनकेलिकलारसज्ञै
र्निन्द्यं सदैव कथितं सुरतोत्सवेषु ॥२२॥

इति योनिस्वरूपसमुद्देशः॥

"अथ सामान्यकर्मसमुद्देशः—

स्त्रीणां कामाधिक्यं प्रतिपादयति—

वन्हि र्न शान्ति मुपयाति कदापि काष्ठै
र्नाम्भोनिधि र्विरमति प्रचुरैः पयोभिः।
नाप्यन्तको जगति जन्तुभि र्गति तृप्तिम्
वामापि नैव पुरुषैः खलु याति तोषम् ॥ २३ ॥

"तस्मा न्नरेण रतिरागविचक्षणेन
माया मुपास्य सकलां स्वरीरसाध्याम् ।
तासां मनोहरणमेव परं विधेयं
नो वेद कोऽपि हृदयं किमु कामिनीनाम् ॥३४॥

इति सामान्यकर्मसमुद्देशः ॥

निसर्गजायाःप्रीतेः स्वरूपम् ।

"नाभ्यासतो नच भवेद् विषयाभिमाना
जन्मान्तरीयसहजा पुरुषस्य नार्या ।
प्रीतिः परस्परतया हृदयावनद्धा
नैसर्गिकीति कथिता कविशेखरेण ॥ ३५ ॥

विषयजायाः प्रीतेः स्वरूपम्।

"स्रकचन्दनाम्बरमनोहरभक्ष्यभोज्यै
नानाविधै रुपचिता विषयैः सदैव ।
प्रीतिः स्मृता विषयजेति कविप्रवीरै
मादर्शयोगसुभगाकथिता समाच ॥ ३६ ॥

अथ अभ्यासिकीं प्रीतिं निरूपयाते

"आलेटाशिल्पसुम्पूजनकोलिरङ्ग
सङ्गीतमैथुनविधा वुपचीयते या ।
अभ्यासकौशलवशेन कृशोदरीणा
मभ्यासिकी निगदिता कविभि-पुरार्यैः ॥ ३७ ॥

इति प्रीतिकरणसमुद्देश·

(६) अथ रागविनाशसमुद्देशः ।

दारिद्र्यदुःखभयनिग्रहगोत्ररोगं
रुङ्गकोपतनुताविभि रोग्नराणाम् ।
रागं त्यजन्ति वनिता इह निस्तरस्य
भीत्या नचास्य कथित सकलो निर्वर्त्त ॥ ३८ ॥

इति रागविनाश समुद्देशः ॥

इति श्रीकृनिशेखर ज्योतीश्वर नृपतिविरचिते—
पञ्चसायके द्वितीय मायक ॥

॥ अथ तृतीयः सायकः ॥

[१] "अथ देहदौर्गन्ध्यहरणसमुद्देशः—

"अङ्गरागविलेपनस्य सुरतादावुपयोगितां दर्शयति—

"प्रागङ्गराग पुष्पेण कार्य स्त्रिया च सम्भोगसुखाय राज्ञी।
तस्मादह गन्धविधानमादौ विलासिनः सर्वमुदीरयामि ॥१॥

"तत्रादौ कामिन्या गात्रदौर्गन्ध्यहरं प्रलेपं निरूपयति—

मधानकालोध्र मगिष्टपत्रं
मचन्दनं दाडिमवल्कलञ्च ।
एषोऽङ्गनाना कथित कवीन्द्रै
शरीरदौर्गन्ध्यहर प्रलेप ॥ २ ॥

अथ धर्मजनितगात्रदौर्गन्ध्यहरं विलपनं वर्णयति—

हरीतकी, चन्दन, मुस्त, नाग-
रुशीरलोध्रोत्पलरात्रिमूलैः ।
स्त्रीपुंसयो घर्मजगात्रगन्धं
विनाशयत्याशु विलेपनेन ॥ ३ ॥

अथ कक्षादि दौर्गन्ध्यहरं प्रलेपं निर्दिशति

हरीतकीश्रीफलमुस्त युक्तं
चिञ्चाफलं पूतिकरञ्जबीजम् ।
कक्षादिदौर्गन्ध्य मपि प्रभूतं
विनाशयत्याशु हठेन योग ॥ ४ ॥

"सचन्दनोशीरकविल्वपत्रैः
कोलाम्लमज्जाऽगुरुनागपुष्पैः ।
लिप्त्वा शरीरं प्रमदाहवेन
चिरप्ररूढं विनिहन्ति गन्धम् ॥

प्रकारान्तरेण तरुण्या गात्रदौर्गन्ध्यहरं प्रलेपं निर्दिशाति

"सदाडिम त्वग्मधुलोध्रपत्रैः
पिष्टैः समानैः पिचुमन्दपत्रैः ।
विलिप्य गात्रं तरुणी निदाघे
दुर्गन्धिघर्म्मापचयं निहन्ति ॥ ५ ॥

अथ घर्म्मस्रुतिहरं प्रयोगमुपदिशाति

सकेशरोशीरशिरीपलोध्र

(१) "हरीतकी" इत्यस्य पद्यस्यान्ते पद्यमेतदधिकं पठ्यते—"म पुस्तके,'—

श्चूर्णीकृतं रङ्गविलेपनेन ।
ग्रीष्मे नराणां न कदापि देहे
घर्म्मस्रुतिः स्यादिति भोजगजः ॥ ६ ॥

इति दुर्गन्धिहरणसमुद्देशः ।

(१) अथ महापरिमलतैलसमुद्देशः ।

अथ महापरिमलतैलं निरूपयति

आदौ बिल्वदलं ततो मरुवकं पुष्पाण्यशोकस्य तु
प्रत्यादित्य मजस्र मेव हविषा ग्रोटि स्तगं निक्षिपेत् ।
केतक्याः कुसुमानि चेह मुहुशः शेषे क्षिपेदादराद्
इत्थं कार्य मिदं महापरिमलं तैलं नरैः सिद्धये ॥ ७ ॥

इति महापरिमलतैलसमुद्देशः ॥

(३) अथ स्नानीयसुगंधिसमुद्देशः ।

अथ कुन्तलचेक्कण्यकरणोपायं निर्दिशति—

"स्वर्णाम्बुदोशीरममीयुतानां पथ्यान्वितानाञ्च विलेपनेन ।
स्नात्वा नरः सौरभमेव सौमाग्यकण्यमाप्नोति शिरोरूहाणाम् ॥

अथ अङ्गसौरभार्थं विलेपन मुपदिशति—

पथ्या-रसालामलकीफलानां
मजम्बुजामृतदलोत्पलानाम् ।

मांसीयुतानां परिलेपनेन
स्नायान्नर सौरभकान्तिवृद्ध्यै ॥ ९ ॥

इति स्नानीयसुगन्धिसमुद्देशः ॥

(४) अथ समान्याङ्गरागसमुद्देशः—

अथ मदनोद्दीपक मङ्गरागं निरूपयति—

हरीतकी-तोयद-तुल्यभागं
शनैश्चरस्यापि चतुर्थभाग ।
तदर्द्धभागः कथितो नरस्य
स्याद्देप गन्धो मदनप्रकाश ॥ १० ॥

अथ नरमोहनाख्य मङ्गरागं दर्शयति—

एला-शटी-पत्रक चन्दनानि
तोया-भया-चन्द्र-घनो-त्पलानि ।
समांशभोऽयंसुरराजयोग्य
स्यात सुगन्धो नरमोहनाख्यः ॥ ११ ॥

अथ सुरनरमनोहरं विलेपनं निर्दिशाति—

ऐणेय-काश्मीर-घना-ऽम्बु-लोध्र-
निशाकरो-शीर समानि पिष्ट्वा ।
लेप. प्रियोऽयं सुरमानवानां
मुदीरितः पङ्कजनीन्द्रवर्यैः ॥ १२ ॥

---

(१) नरमोहनाख्य इति पुस्तकान्तरे पाठान्तरम् । (२) "कर्पूरवर्यैः" इति पुस्तकान्तरे ।

अथ विलासिनीनां सङ्गौरभार्थं प्रलेपं कथयति—

उशीर-कृष्णागुरु-चन्दनानि
पत्रा-ऽम्बु-तुल्यानि घनानि पिष्ट्वा ।
एतानि गात्रेषु विलासिनीनां
श्रीखण्डतुल्यं कथयन्ति गन्धम् ॥ १३ ॥

इति सामान्याङ्गरागसमुद्देशः ॥

(५) "अथ सर्वोत्तमगन्धसमुद्देशः ॥

अथ नरेन्द्रवृन्दाभिनन्दनीयं सुगन्धं निरूपयति—

"जाती-कर्कट-रक्तचन्दनघनश्रीवासशैलेयक
कस्तूरी कनकं सतङ्गकुसुमैः स्थौणेयकं संयुतम् ।
एतानीन्दुयुतानि पर्णजरसैः पिष्टोऽङ्गरागः शुभः
कार्यो गन्धकलाकलापकुशलैश्चोर्वीन्द्रयोग्यः सदा ॥१४॥

अथ कस्तूरीदलाभिधं विलेपनं निर्दिशति—

"पथ्या भागचतुष्टयं जलमुचो भागैकमात्रं मतं
जात्या भागयुतं तथैव शशिनः स्थौणेयभागद्वयम् ।
भागाः पञ्च शिलारसकस्य कथिता भागो नखस्यापि च
कस्तूरीदलसंज्ञकं निगदितं सौरभ्यविद्भिरिदम् ॥ १५ ॥

"अथ सौरभ्यगर्भाभिधं प्रलेपं निरूपयति—

पथ्या भागचतुष्टयं जलमुचो भागैकमात्रं मदा
श्रीखण्डागुरुजातिकामृगमदस्योक्ताश्च भागास्त्रयः ।
मांसीपत्रतुपारचालकमर्मः सम्यक्कृतया पेषितः
सर्वैरेभिरिहोत्तमः प्रकथितः सौरभ्यगर्भाभिधः ॥ १६ ॥

इति सर्वोत्तमगन्धसमुद्देशः ॥

[६] अथ मुखवाससमुद्देशः—

अथ रसालफलसारादिकृतं वदनवासमुपदिशति

"रसाल- जम्बूफल-गर्भसारः
मकर्कटो माक्षिक-संयुतश्च ।
स्थितो मुखान्ते पुरुषस्य रात्रौ
करोति सौरभ्यसुखं मुखस्य ॥ १७ ॥

अथ गुडत्वगादिकृतां वटिकां निर्दिशति—

"गुडत्वगेला-नख-जातिकाह्वैः
स्वर्णान्वितः क्षुद्रवटी विधेया ।
ताम्बूलगर्भा दिवसे च रात्रौ
करोति पुंसां मुखवास मिष्टम् ॥ १८ ॥

अथ मुखवासकरं कुष्ठचूर्णप्रयोगं निरूपयति

"यः कुष्ठचूर्णं मधुना घृतेन

(१) अस्यापद्यस्य द्वितीयः पादः समस्तपुस्तकेषु स्वेत्थमेव लिखितम् । तृतीयः पादस्तु न शोभितः ॥

(२) "सौरभ्यमय" इति गपुस्तकीयं पाठान्तरम् । "सौरभ्यगर्भा" इति क्वचित् पाठान्तरम् ।

पिकास्वबीजान्वित मत्ति नित्यम् ।
मासिकमात्रेण मुखं तदीयं
गन्धायते केतकिपुष्पतुल्यम् ॥ १६ ॥

इति मुखवासनसमुद्देशः ।

(७) अथ वाजीकरणयोगसमुद्देशः

अथ वाजीकरणप्रयोजनं निरूपयति

यत्नेन नारी परितोषमेति
न हीनवीर्यस्य कदापि सौख्यम् ।
अतो यलार्थं रतिलम्पटस्य
बीजाभिधानं प्रथमं विदध्यात् ॥ २० ॥

अथ विदारीचूर्ण प्रयोगं निर्दिशति

चूर्णं विदार्याः स्वरसेन तस्याः
सम्भावितं भास्कररश्मिजाले ।
मध्वाज्य-सम्मिश्रित माशु लीढ्वा
दश स्त्रियो गच्छति निर्विशङ्कः ॥ २१ ॥

अथ आमलकचूर्ण-प्रयोगं निरूपति

"भूयो विभाव्याऽऽमलकस्य चूर्णं
रसे न तस्यैव सिताज्यमिश्रम् ।

सचांद्र मालेढि निशामुखे यो
नूनं स वृद्ध स्तरुणत्त्व मेति ॥ २२ ॥

अथ शतावर्यादिचूर्णविधान माह

शतावरी-वानरि-गोचुराणां
गोरच मातङ्गबलाबलानाम् ।
चीरेण चूर्णानि निपीय गत्रौ
मथ्नाति दर्प तरुणी जनस्य ॥ २३ ॥

अथ वर्तक्यादीनां मांसप्रयोग माह—

यो वर्तकीलावकपिञ्जलानां
मांसं तथा वेश्मविहङ्गमस्य ।
(१)व्येन सिद्धं सह सैन्धवेन
महाबलः स्यादुपभुज्य नूनम् ॥२४ ॥

अथ कोकिलाचवीजानां विधानमाह—

मित पिक तरु बीजं तण्डुलाः षष्टिकानां
मघृतमधुममेतं प्रत्यहं योऽवलेढि ।
जठर कुहरमध्ये याति यावन्न पाकं
रमयति कृशदेहोऽप्यङ्गनानां सहस्रम् ॥ २५ ॥

अथ मांस्यादि चूर्ण प्रयोग माह—

मांसीं विदारीश्च तथोच्चटांश्च
चीरे गवां चौद्र घृतोपपन्नाम ।
पीत्वा नरः शर्करया सुयुक्तां
कुलिङ्गवद् हृष्यति सर्वरात्रिम् ॥ २६ ॥

(१) "आज्येन" इति पाठान्तरम् ।

अथ शाल्मलीमूलादिविधानमाह—

लघुशाल्मलिमूलेन तालमूलीं सुचूर्णिताम् ।
सर्पिषा पयसा पीत्वा रतौ चटकवद् भवेत् ॥ २७ ॥

अथ वृद्धशाल्मलिमूलस्वरसविधानमाह ।

वृद्धशाल्मलिमूलस्य रसं शर्करयापिबेत् ।
एतत्प्रयोगात्सप्ताहाज्जायते रेतसोऽम्बुधिः ॥ २८ ॥

इति वाजीकरणसमुद्देशः ॥

[८] "अथ योनि गाढीकरण समुद्देशः

"अथ योनिगाढीकरण प्रयोजनं निर्दिशति–

प्रौढाङ्गनाया नवसूतिकायाः
श्लथं वराङ्गं न सुखाय यूनाम् ।
तस्मान्नरै भेषजतो विधेया
गाढा क्रिया मन्मथ मन्दिरस्य ॥ २९ ॥

"अथ निशादि प्रलेप माह—

"निशाद्वयं पङ्कजकेशरञ्च
निष्पिष्य देवद्रुमतुल्यभागम् ।
अनेन लिप्तं मदनातपत्रं
प्रयाति सङ्कोच मलं युवत्याः ॥ ३० ॥

[1]अथ धातक्यादि प्रयोग माह

सधातकी–पुष्पफल त्रिकेन
जम्बूत्वचासाररसै र्युतेन ।
लिप्त्वा वराङ्गं मधुकेन तुल्यं
वृद्धापि कन्येव भवेत् पुरन्ध्री ॥ ३१ ॥

अथ कोकिलाक्ष बीज प्रयोग माह

पिकाक्षबीजेन मनोजगेहं
विलिप्य योषा नियमं चरन्ती ।
हठेन गाढं लभते तदङ्गं
दृष्टो नरे रेप सदैव योगः ॥ ३२ ॥

अथ इन्द्रगोपविधानं निरूपयति

मा शक्रगोपं स्वयमेव पिष्ट्वा
विलिम्पति स्त्री कुसुमेषुवेश्म ।
आहत्य काठिन्य मलञ्च गाढं
भवेच्च नात्रास्ति विकल्पमत्ता ॥ ३३ ॥

अथ इन्दीवरादिप्रलेपविधान माह

इन्दीवरव्याधिवचोपखानां
तुरङ्गगन्धाढ्ययामिनीनाम् ।

(१) त्वरसेन स्वकीयं कुसुमेषुवेश्म इति पाठान्तरम् ।

(२) रजनीद्वयानामिति पाठान्तरम् ।

लेपेन नार्या स्मर-वेश्मरन्ध्रं

सङ्कोचयत्याशु हठेन योगः ॥ ३४ ॥

अथ मदनफलादियोगमाह

मदनफलघनसारं चाद्रतुल्यंवराङ्गं

शिथिलतममपि यस्या पूरितं भूय एव ।

भवति कठिनमुच्चैः कर्कशं कामिनीना

मिति निगदति योगं गन्तिदेवो नरेन्द्रः ॥३५॥

इति योनिगाढीकरणमुद्देशः ॥

(६) "अथ कामिनीद्रावणमुद्देशः–

"अथ कामिनी द्रावण प्रयोजनं निरूपयति–

"यद्यप्यष्टगुणाधिको निगदितः कामोऽङ्गनानां सदा

नो याति द्रवतां तथापि झटिति व्यायामिनां सङ्गमे ।

तस्माद्भेपज-सम्प्रयोगविधिना संक्षेपतो द्रावणं

किञ्चित्पल्लवदायि पङ्कजदृशां प्रत्यायनं कामिनः ॥३६॥

अथ सिन्दूरादिप्रयोग माह–

"सिन्दूर-चिञ्चाफल-माक्षिकानि

तुल्यानि यस्या मदनातपत्रे ।

निक्षिप्यते सा पुरुष-प्रसङ्गात्

प्रागेव रेतः-स्रुति मातनोति ॥३७॥

"अथ घोषाचूर्णप्रयोगं दर्शयति–

"घोषारज[१] चौद्रसमन्वितं वा
चिप्तं यदीये मदनातपत्रे ।
द्रुता भवेत्सा हठमेव नारी
दृष्ट. मदाऽयं किल योगराजः ॥३८॥

"अथ टङ्कणचूर्णप्रयोगं दर्शयति–

अगस्त्य-पत्र-द्रव-संयुतेन
मध्वाज्य-सम्मिश्रित-टङ्कणेन ।
लिप्त्वा ध्वजं यो रमतेऽङ्गनायाः
स शुक्रमावर्षति शीघ्रमेव ॥३९॥

"अथ रोध्रादिचूर्णप्रयोगमाह–

स रोध्र-धत्तूरक-पिप्पलीनां
त्तुद्रोषणा-चौद्र विमिश्रितानाम् ।
लेपेन लिङ्गस्य करोति रेतः–
स्रुतिं विपत्त-प्रमदाजनस्य ॥४०॥

"अथ बीजपूरमूलप्रयोगं निर्दिशति–

तुपकण-परिमिश्रं बीजपूरस्य मूलं
दिवस-कर-मयूखे मर्दितं वेश्मनीस्मम् ।

(१) "घोषा रजः" इति गपुस्तकस्य पाठान्तरम् ।
(२) ग पुस्तके श्लोक नवाग पर्यायेण दृश्यते
सिद्धार्थमांसचतुष्कमाला जानाग्रगलन जलेन पिष्ट्वा ।
विलिप्य लिङ्गं प्रमदासुरतात् स्पर्शेन रेत चरति प्रकामम् ॥
(४) "रामसेम्म" इति गपुस्तिनः पाठः ।

द्रवति झटिति कान्ता भेषजस्यास्य योगा-
दिति वदति नरेन्द्रो रन्तिदेवः कवीन्द्रः ॥४१॥

इति कामिनीद्रावणमुद्देशः ।

[१०] "अथ ध्वजस्थूलीकरणमुद्देशः-

"अथ ध्वजवृद्ध्यर्थं कुष्ठाद्यचूर्णमाह-

स कुष्ठ-मातङ्ग बलाऽबलानां
वचाऽश्वगन्धागजपिप्पलीनाम् ।
तुरङ्गशत्रो नवनीतयोगात्
लेपेन लिङ्गं मुशलञ्च मेति ॥४२॥

अथ ब्रह्मवल्ल्यादिचूर्णप्रयोग माह-

किमत्र चित्रं यदि ब्रह्मवल्ली-
वचाऽश्वगन्धा-जलशूकचूर्णम् ।
उन्मत्तबीजं बृहतीफलाढ्यं
घर्षेन कुर्यान्मुशलप्रमाणम् ॥४३॥

अथ लोध्रादितैलविधानमाह-

सलोध्र-कासीस-तुरङ्गगन्धा-
हेमप्रसून परिपाचितेन ।

तैलेन वृद्धिं खलु याति लिङ्गं
वराङ्गनाऽलोकनमोहनञ्च ॥४४॥

इति ध्वजस्थूलीकरणसमुद्देशः ॥

[११] "अथ ध्वजदृढीकरणसमुद्देशः—

अथ करवीरदलादिप्रलेपविधानमाहः—

हयारि पत्रं नवनीत मध्ये
वचा-बला-नाग बलामयैश्च।
लेपेन लिङ्गं महसैव पुंसां
लोहोपमं स्यादिति दृष्टमेतत् ॥४५॥

इति ध्वजदृढीकरणसमुद्देशः ॥

(१२) "अथ वीर्यस्तम्भनसमुद्देशः—

अथ लज्जालुमूलादिप्रयोगं निरूपयति—

क्षीरेण वस्तस्य च वल्लमूलं
लज्जालु-मूलं स्वयमेव पिष्ट्वा।
य स्तु स्वपादौ परिलिप्य शेते
रेतो न तस्य द्रवते कदाचित् ॥४६॥

अथ श्वेतशरपुङ्खफलादिप्रयोग माह—

श्वेतपुपुङ्खाख्य-तरोः फलानि
क्षीरेण पिष्ट्वा वट-पादपस्य।
करञ्ज-बीजोदर मध्यगानि
रुन्धन्ति वीर्यं वदने धृतानि ॥४७॥

---

(१) 'पत्तामात' इपुस्तकाथ पाठ।

''अथ शरपुङ्खमूलप्रयोगं निर्दिशति—

श्वेतपुङ्खा-चरणं गृहीत्वा
पुष्यार्कयोगे पुरुषस्य कट्याम् ।
कुमारिका-कर्तित सूत्रकेण
बद्धं न यात्याशु मनोजनीरम् ॥४८॥

अथ काकजंघामूलविधान माह—

''आदाय कृष्णेतर काकजङ्घा-
मूलं सिताम्भोरुह-केशरञ्च ।
चौद्रेण पिष्ट्वा परिलिप्य नाभिं
स्तम्भं प्रयात्याशु नरस्य बीजम् ॥४६॥

इति वीर्यस्तम्भनसमुद्देशः ।

(१३) ''अथ तिलकसमुद्देशः—

अथ मञ्जिष्ठादितिलकप्रयोग माह—

मञ्जिष्ठ-तोयद-वचा सितभानु मूलैः
र्मायाङ्ग शोणितयुतैः समकुष्ठकैश्च ।
कृत्वा ललाटफलके तिलकं कृतज्ञो
लोकत्रयं वशयति क्षणमात्रकेण ॥५०॥

इति तिलकसमुद्देशः ।

(१४) "अथ अञ्जनसमुद्देशः—

अथ वशीकरणार्थं कज्जलप्रयोग माह—

देवीमहोत्सवदिने किल कज्जलं यत्
सिद्धार्थकस्य सुरसेन नरोत्तमाङ्गे ।
निःपातितं नरवरेण निशि श्मशाने
तन्नेत्रगं भुवन मेव वशं करोति ॥५१॥

इत्यञ्जनसमुद्देशः ।

(१५) "अथ चूर्णसमुद्देशः—

अथ वशीकरणार्थं कुष्ठादिचूर्ण माह—

कुष्ठोत्पलं मधुकरस्य च पत्रयुग्मं
मूलं तथा तगरजं सितकाकजंघा ।
यस्याः शिरोगतमिदं विहितन्तु चूर्णं
दासीभवेज्झटिति सा तरुणी न चित्रम् ॥५२॥

इति चूर्णसमुद्देश ॥

(१६) अथ लेपन-समुद्देशः—

अथ वीर्यप्रलेपविधान माह——

मध्येन पाणिकमलेन निशावसाने
यो रेतसा निजभवेन विलासिनीनाम् ।

---

(१) नित्रकाञ्जनम् इति ग पुस्तकाय पाठान्तरम् ।

(२) घ पुस्तके पद्यमेतदधिकमित्यनाऽग्रे पठ्यते नानाश कुष्ठतर्गते परिलिप्य-वति सिद्धार्थनानाहित स्टपस्वद्धम । पुंस कपोलफलके विनिपातनेन तेनाञ्जनेन-नरेता स्त्रिलर्पानियोग ।

वामे।विलिम्पति पदं मदमेव यस्या
स्तस्यैव सा भवति नात्र विकल्पभावः ॥५३॥

अथ पतिदासीकरणप्रयोगमाह—

सम्भोग-शेष-समये निज-कान्त-मेढ़ं।
या कामिनी स्पृशति वामपदाम्बुजेन।
तस्याः पतिः सपदि विन्दति दासभावं
गोणी-सुतेन कथितः किल योगराजः ॥ ५४ ॥

अथ कपोतमलादिप्रलेपविधान माह—

सिन्धूत्थ-माक्षिक-कपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य तरुणीं रमते नरो यः।
सान्यं प्रयाति पुरुषं न कदापि कामं
दासीभवेदतिमनोहरदिव्यमूर्तिः ॥ ५५ ॥

अथ भल्लूकमेढ्घनसारादिप्रयोगमाह—

"भल्लूक-मेढ्-घनसार-मधूनि पिष्ट्वा
लिप्तध्वजो निधुवनं विदधीत यस्याः।
साह्लादिनी कुसुमसायकमत्तनाङ्गी
वश्या भवेच्चिरतरं न हि संशयोऽत्र ॥ ५६ ॥

अथ गोरोचनादिप्रलेपं निरूपयति—

गोरोचना-शिशिरदीधिति-शम्भुबीज-
काश्मीरचन्दनयुतैः कनकद्रवैश्च।

लिप्तध्वजः परिरमत्यबलां नरो य-
स्तस्याः स एव हृदये मुकुटत्वमेति ॥ ५७ ॥

इति लेपनसमुद्देशः ॥

अथ धूप-समुद्देशः—

भृङ्गी-वचा-युवति-सर्जरसं समानं
कृत्वा गुटिं मलयजञ्च पडेव मिश्रम् ।
यो धूपयेन्निजगृहं वसनं शरीरं
तस्यापि दास इव मोह मुपैति लोकः ॥ ५८ ॥

इति धूपसमुद्देशः ।

[१८] अथ काममन्त्रसमुद्देशः—

अथ मदनमन्त्रं दर्शयति—

"ॐ मद मद मादय मादय ह्रीं अमुकीं वशमानय स्वाहा"—
अस्य मन्त्रस्य दशसहस्रसङ्ख्याकोऽन्मितो जपः ।
रक्तवर्णैः प्रसूनैर्मधुना घृतेन च होमः करणीयः ॥

---

(१) मत्संग्रह पुस्तके यद्यपि लेपनसमुद्देशे बहूनि पाठान्तराण्यपि समुपलभ्यन्ते, तथापि तानि प्राचीनपुस्तकानिर्दिष्टानीति नात्र निवेशितानि ।

(२) मत्संग्रहपुस्तके पद्येन मन्त्रमिमं पठति लेखकः —
यथा—"मदमदपदमाद्यौ मादयोर्ह्रींविचारं"
तदनु च लिखनार्थं सौख्यद श्री च तस्मात् ।
अथ च पदमुपान्ते नामसम्पादि मंत्रो
भवति मदनमन्त्रः स्वाहया संयुतोऽयम् ॥
पद्यमिदं प्राचीन पुस्तकेषु मूले न लब्धमिति टिप्पण्यां निविष्टम् ।

(३) मत्संग्रह पुस्तके एतदर्थं पद्येन पठ्यते—
शतशतपरिजापात् स्याद्दयं सिद्धिदानाद्दशदशकुसुमानां [illegible] होमात् ।
इह तु [illegible] कार्यं मुपदिशति [illegible] ॥

सर्वं वामहस्तेन कर्तव्यम् ।

अथ ध्यानम्—

कनकरुचिरमूर्तिः कुण्डलाकृष्टचापो
युवतिहृदयमध्ये निश्चलारोपिताचः ।
इति मनसि मनोज्ञं ध्याययेद्यो जपस्थो
वशयति स समस्तं भूतलं मन्त्रशक्त्या ॥ ५८ ॥

इति काममन्त्र समुद्देशः ।

(१६) अथ चामुण्डामन्त्र समद्देशः—

अथ चामुण्डमन्त्रः—

ॐ चामुण्डे ! जाय चामुण्डे ! माहयअमुकीं वशामानय स्वाहा" इति मन्त्रः ॥

अस्यमन्त्रस्य जपोलक्षमेकम् ।
मदिरामिश्रित पलासकुसुमहोमः करणीयः ।
सर्वं वामहस्तेन कर्तव्यम् ॥

---

(१) "मन्त्रोऽयं पद्येन पश्चाने नपुस्तके—
चामुण्डे ! प्रथमं जयेनिकथितं मम्बोधनेमोदय
मानन्तं वशमानयेति च पद मध्यं द्वितीयायुतम् ।
स्वाहान्तः प्रणवादिरेव कथित मन्त्रे महामोहन
मन्मन्त्र. कविनार्थे मेदिनिवदो नाम्नात्रिंशोभुवि ॥

अथ चामुण्डायाः ध्यानम्—

दंष्ट्राकोटिविसङ्कटा सुवदना सान्द्रान्धकारेस्थिता
खट्वाङ्गासि-निगूढदक्षिणकरा वामे सपाशंशिरः ।
श्यामापिङ्गलमूर्द्धजाभयकारी शार्दूलचर्माम्बरा
चामुण्डा शववाहिनी जपविधौध्येया सदासाधकैः ॥ ६० ॥

इति चामुण्डा मन्त्रसमुद्देशः ॥

[२०] विश्वेश्वरीसमुद्देशः—

अथ विश्वेश्वरीमन्त्रं निरूपयति—

"ॐ नमश्चामुण्डे हिलि हिलि अमुकीं वशमानय स्वाहा"

अस्य मन्त्रस्य जपो लक्षपरिमितः ।
पलाशकुसुमैश्च होमः करणीयः ॥

सर्वं वामहस्तेन कर्तव्यम् ।

अथ विश्वेश्वरीध्यानम्–

वज्रासकशरासना त्रिनयना सव्येतरे साङ्कुशं
वामेनापि करेण पाशमुरसि न्यस्तोत्तमाङ्गस्रजा ।
व्यामुक्तोरुकचा करालवदना वह्निप्रभा मध्यगा
ध्येया जाप्यविधौ नरै रिति सदा विश्वेश्वरीसिद्धये ॥६१॥

इति विश्वेश्वरीसमुद्देशः ॥

(१) ग्रमंजकपुस्तके विश्वेश्वरीमन्त्रसमुद्देशो नोपलभ्यते ।

[२१] अथ पद्मिनीमन्त्रसमुद्देशः—

अथ पद्मिनीवशीकरणमन्त्रं निरूपयति=

"ॐ कामेश्वर ! मोहय स्वाहा" इति मन्त्रः ॥

अनेन मन्त्रेण मधुमिश्रित-जातीकुसुम-सहितं
ताम्बूलमादित्यदिने पञ्चशतवार मभिमन्त्रितं
पद्मिन्यै दातव्यम् । पद्मिनी वश्या भवति ॥ [क]

इति पद्मिनीमन्त्रसमुद्देशः ॥

[२२] अथ चित्रिणीमन्त्रसमुद्देशः=

अथ चित्रिणीवशीकरणमन्त्रः=

"ॐ पच पच ॐ विहङ्गम विहङ्गम ॐ कामदेवाय स्वाहा"
इति मन्त्रः ।

अनेन मन्त्रेण रम्भामूलजलपुटित-जातीफल-मिलित-
ताम्बूलमादित्यदिने पञ्चशतवार=
मभिमन्त्रितं चित्रिण्यै दातव्यम् ।
चित्रिणी वश्या भवति ॥

इति चित्रिणीमन्त्रसमुद्देशः ॥ [ख]

(१) "सहस्रवारम्" इति क पुस्तकस्य पाठान्तरम् ।

(२) "ॐ किरि २ अमुकं वश्य कुरु कामदेवाय स्वाहा" इति ग पुस्तकीयं पाठान्तरम् ।

(२३) अथ शङ्खिनीमन्त्रसमुद्देशः ।

अथ शङ्खिनी-वशीकरणमन्त्रः=

"ॐ हर हर ॐ पच पच कामदेवाय स्वाहा=" इति मन्त्रः ।

अनेन मन्त्रेण तगरमूलं श्रीफलश्चादित्यवारे—
अष्टोत्तरशतवारमभिमन्त्रितं शङ्खिन्यै-
दातव्यम् । सा वश्या भवति ॥७॥

इति शङ्खिनीमन्त्रसमुद्देशः ।

अथ हस्तिनीमन्त्रसमुद्देशः—

[२४] अथ हस्तिनीवशीकरणमन्त्रः=

"ॐ चिरि चिरि वशं कुरु कामदेवाय स्वाहा" इति मन्त्रः ।

अनेन मन्त्रेण आदित्यदिने चाँद्रार्तौ कपोत-
भ्रमरौ ताम्बूलदले विन्यस्य अष्टोत्तरशत—
मभिमन्त्रितं कृत्वा हस्तिन्यै देयम् ।
हस्तिनी वश्या भवति ॥ [८]

इति हस्तिनीमन्त्रसमुद्देशः ।

---

(१) ख संज्ञक पुस्तके "शङ्खिनीमन्त्रसमुद्देशो हस्तिनीमन्त्रसमुद्देशश्च न पठ्यते, परं पद्मिनीमन्त्रसमुद्देशस्य चित्रिणीमन्त्रसमुद्देशस्य चोपलभ्यमानत्वा दवशिष्टं समुद्देशद्वयमपि वर्णनीयमिति मूल एव विन्यस्तमिति ॥

(२५) "अथ अनिच्छाहरणसमुद्देशः—

अथ अनिच्छाहरणोपायं निरूपयति ।

चीरेदनं द्विजवराय पुनः प्रदद्यात्
पुष्पोद्धृतं सित बला चरणं कुमार्या ।
पिष्टं प्रदत्तामिति वैरिकृतामनिच्छां
निःसार्येदिह मुहुर्विदित प्रभावः ॥६२॥ [इ]

इत्यनिच्छाहरणसमुद्देशः ।

[२६] अथ स्तनोत्थापनसमुद्देशः ।

अथ गजपिप्पल्यादि विधानम् ।

"मातङ्गकृष्णामयवाजिगन्धा"
वचायुताः पर्युषिताम्बुमिश्रा ।
हयारिपत्रीनवनीतयोगात्
कुर्वन्ति पीनं कुचकुम्भयुग्मम् ॥६३॥

अथ स्तनवृद्धिकरं भुजङ्गवसादिप्रयोगमाह—

वसा भुजङ्गस्य हयारि-पत्र्य
कोलस्य मेदः समभागयुक्ता ।
वक्षोज कुम्भं मर्दितयताभ्याः
कुर्वन्ति पीनं सकलं हठेन ॥६४॥

अथ दाडिमकल्कसाधितं सिद्धार्थतैलविधानमाह—

"तैलं हठाद् दाडिमकल्क सिद्धं
सिद्धार्थजं लेपनतो नितान्तम् ।

नागी-स्तनौ चारुतटौ सुपीनौ

कुर्यादसौ योगवरः सदैव ॥६५॥

इति स्तनोत्थापनसमुद्देशः ।

[२७] "अथ पतितस्तनोत्थापनसमुद्देशः–

"अथ श्रीपर्णिकातैलं निरूपयति—

श्रीपर्णिकाया रसकल्कसिद्धं

तिलोद्भवं तैलवरं प्रदिष्टम् ।

तैलेन वक्षोजयुगे प्रदेयं

प्रयाति वृद्धिं पतितोऽपि नार्याः ॥६६॥

इति पतितस्तनोत्थापनसमुद्देशः ।

[२८] "अथ योनि-संस्कारसमुद्देशः–

"योनिधूपनविधिं दर्शयति"–

प्रक्षालयेन्निम्ब-कषायनीरै–

र्निशाज्यकृष्णाऽगुरुगुग्गुलूनाम् ॥

धूपेन योनिं निशि धूपयित्वा

नारी प्रमोदं विदधाति भर्तुः ॥६७॥

अथ जातिकुसुमतैलं निरूपयति—

जातीप्रसूनैः सितसर्षपस्य

तैलं पचेल्लघ्वनले प्रधानम् ।

८(१) प्रक्षेपादिति पाठान्तर साधीयः ।

अभ्यङ्गयोगेन मर्दव योनौ
सौभाग्यमाप्नोति रते पुरन्ध्री ॥६८॥

इति योनिसंस्कारसमुद्देशः ।

[२६] "अथ रोमशातनसमुद्देशः—

अथ भुजङ्गतैलप्रयोगमाह—

"भुजङ्ग-तैलं कटुतैलमध्ये
सप्ताहमादित्यकरं निधेयम् ।
तत्तैल-योगेन विलासिनीनां
नश्यन्ति रोमाणि समूलमेव ॥ ६६ ॥

"अथ तालकादिचूर्णमाह—

"पलाश-भस्मान्वित-तालचूर्णैः
रम्भाम्बुमिश्रैरुपलिप्य भूयः ।
कन्दर्पगेहे मृगलोचनानां
रोमाणि रोहन्ति कदापि नैव ॥ ७० ॥

"अथ मृतशङ्खादिचूर्णप्रयोगमाह—

रम्भाजले सप्तदिनं विभाव्य
सम्मेह कम्बोर्मसृणञ्च पश्चात् ।
तालेन युक्तञ्च विलेपनेन
रोमाणि निर्मूलयति क्षणेन ॥ ७१ ॥

इति रोमशातनसमुद्देशः ॥

"अथ स्मरमन्दिरपुष्पसमुद्देशः—

अथ ज्योतिष्मतीपत्रप्रयोगमाह—

"ज्योतिष्मतीकोमलपत्रमग्र्यं
भृष्टं जवायाः कुसुमेन पिष्टम् ।
गृह्याम्बुना पीतमिदं युवत्या
करोति पुष्पं स्मरमन्दिरस्य ॥ ७२ ॥

इति स्मरमन्दिरपुष्पसमुद्देशः ॥

(२१) "अथ गर्भधारणसमुद्देशः—

"अथ तुरङ्गगन्धापाचितदुग्धप्रयोगमाह—

"तुरङ्गगन्धाश्रित-वारि-सिद्ध-
माजं पयः स्नानदिने निपीय ।
प्राप्नोति गर्भं नियमं चरन्ती
वन्ध्यापि सूनुं पुरुषप्रसङ्गात् ॥७३॥

"अथ लक्ष्मणाचूर्णं निरूपयति ।

पुष्योद्धृतं लाक्ष्मणमेव मूलं
पुंसा निपिष्टं सघृतञ्च पीतम् ।
क्षीरोदनं प्राश्य पतिप्रसङ्गाद्
गर्भं विधत्ते तरुणी न चित्रम् ॥७४॥

---

(१) क-पुस्तके समुद्देशोऽयं नोपलभ्यते ।

(२) ग-पुस्तके पद्यद्वयमधिकं दृश्यते तच्च प्राचीनपुस्तकपाठविरोधान्न लिखितम् ।

(३) "इति नष्टपुष्पसमुद्देशः" इति ग-पुस्तकीयं पाठान्तरम् ।

अथ बीजपूरमूलप्रयोगमाह–

या बीजपूरद्रुमसूलमेकं
क्षीरेण सिद्धं हविषा विमिश्रम् ।
स्त्री निपीय व्रजति प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥७५॥

इति गर्भधारणसमुद्देशः

"अथ गर्भसंस्थापनसमुद्देशः—

"अथ कशेरुकादिसाधितदुग्धप्रयोगमाह–

कशेरुशृङ्गाटकजीवनानि
पयो-घनखण्डशतावरीभिः ।
सिद्धं पयः शर्करया विमिश्रं
संस्थापयेद्गर्भमुदीर्णशूलम् ॥७६॥

इति गर्भधारण समुद्देश ॥

[३२] "अथ सुखप्रसवसमुद्देशः—

अथ सुखप्रसवमन्त्रः—

ॐ इहामृतञ्च सोमश्च चित्रभानुश्च भामिनि ।
उच्चैःश्रवा तुरङ्गाणां मन्दिरे निवसन्तु ते ॥ ७७ ॥

"अथ द्वितीयः सुखप्रसवमन्त्रः—

ॐ इदममृतमपां समुद्धृतं येन त्वं लघु गर्भमिमंविमुञ्चतु स्ति ।

१-३। १ …… समुद्देश २। १ ……म ।

नदनल पवनाऽर्क वामरा स्ते सह

लवणाम्बुधर्गर्दिशन्तुशान्तिम् ॥ ७८ ॥

"अथ सुखप्रसवकरस्तृतीयो मन्त्रः—

ॐ मुक्ताःपाशा विपाशाश्च मुक्ताःसूर्येण रश्मयः ।

मुक्तः सर्वभयाद् एहि मा चिर मा चिरम् स्वाहा" ॥७९॥

"अथ मन्त्राणां प्रयोग विधानमाह—

एभिर्जलं च्यावनमन्त्रगर्भं

जप्त्वा प्रदेयं किल गर्भवत्यै ।

सद्यः प्रसूते नवगूढगर्भा

योगोऽयमात्रेयमुनिप्रदिष्टः ॥ ८० ॥

एभिर्मन्त्रैः सप्तवाराभिमन्त्रितं जलंगर्भवत्यैपातुं दातव्यम् ॥

"अथ अपरः सुखप्रसवकरोमन्त्रः—

"ॐ मन्मथ मन्मथ मन्मथवाहिनि ! लम्बोदरं

मुञ्च मुञ्च लघु स्वाहा" इति मन्त्रः ॥

अनेन मन्त्रेण सप्तवाराभिमन्त्रितं जलं गर्भवत्यै

पातुं दातव्यम् । सुखात प्रसवोभवति ॥

इति सुखप्रसवमन्त्रसमुद्देशः ।

(१) [illegible]

(२) [illegible]

(३३) अथ वन्ध्याकरण समुद्देशः--

अथ पलाशबीजादिप्रयोगमाह—

पलाशवीजद्रुमयोः फलानि
पुष्पाण्यथो शाल्मलिपादपस्य।
मधेन मासार्द्धदिनं निपीय
वन्ध्यां भवेन्निश्चितमेव नारी ॥ ८१ ॥

"अथ कदम्बफलप्रयोगमाह—

फलं कदम्बस्य च माक्षिकानि
तुषोदकेन त्रिदिनं निपीय।
स्नानावसानेनियमेन चापि
वन्ध्यामवश्यं कुरुते हठेन ॥८२॥

अथ राक्षसवृक्षबीजप्रयोगमाह—

कर्षद्वयं राक्षसवृक्ष-बीजं
सप्ताहमात्रं सितशालिवारा।
रजौ निपीतं मृगशावकाच्या
वन्ध्यात्वमेताश्रियतं करोति ॥८३॥

इति वन्ध्याकरण समुद्देशः।

[३४] अथ केशसंस्कारसमुद्देशः।

तिलप्रसूनादिप्रलेप—
तिल-प्रसूनं सह गोक्षुरेण

समारघं गव्यघृतेन पिष्टम् ।
सप्ताहमात्रेण शिरः प्रलेपात्
भवन्ति दीर्घाः प्रचुराश्चकेशाः ॥८४॥

अथ निम्बस्य तैलं निरूपयति—

"कर्षार्द्धमात्रं प्रसवं फलेन
निम्बस्य तैलं नियमेन पीतम् ।
क्रमेण कुन्देन्दु-तुषारगौरं
शिरोरुहं मेचकतामुपैति ॥८५॥

इति केशसंस्कारसमुद्देशः ।

(३५) अथ इन्द्रलुप्तसमुद्देशः—

अथ गुञ्जाफलप्रयोगमाह—

गुञ्जाफलैः चाद्रयुतं विलिप्य
केशप्रदेशं सकलेन्द्रलुप्तम् ।
अनेन योगेन सदैव केशाः
रोहन्ति कृष्णाः कुटिला विशालाः ॥८६॥

इति इन्द्रलुप्तसमुद्देशः ।

इति पञ्चसायके तृतीय सायकः

(१) "केशप्रदेशे सकलेन्द्रलुप्तं" इति पाठान्तरम् ॥

(२) कपुस्तके समुद्देशं+चात्र चतुर्थः सायकः समाप्यते ।

अथ चतुर्थः सायकः

[१] "अथ कन्यालक्षणसमुद्देशः—

अथ विवाहोचितकन्यायाः स्वरूपं वर्णयति

"प्रख्याते महति प्रभूतविभवे चारित्र्यशीलान्विते
विद्या धैर्य-विवेक-शौर्य विभव-श्लाघ्ये कुलीने कुले ।
कन्या भ्रातृयुता सुशीलविनया रूपोज्ज्वला दक्षिणा
त्रैवर्गाश्रितशुद्धवंशनिलया सद्भिर्विवाह्या नरैः ॥ १ ॥

प्रकारान्तरेण स्वरूपं निरूपयति—

अम्भोजास्या बहलनयना भृङ्गिकेशप्रभाग
तुल्या स्निग्धा सुसमदशना पक्वरागाधरोष्ठी ।
रम्यश्रोणा मधुरवचना कम्बुकण्ठी शुभाङ्गी
मध्ये क्षीणा सुललितकरा दक्षिणावर्तनाभि ॥ २ ॥
"पीनश्रोणी कनककदलीस्तम्भजङ्घाभिरामा
रक्ताशोकप्रभवचरणा स्निग्धशाखाङ्गुलीका ।
इत्थं पुत्री सुललिततनुर्लक्षणैरुत्तमैर्या
कन्या सद्भिश्चटुलचरिता सा विवाह्या गुणज्ञैः ॥ ३ ॥
इति कन्यालक्षणसमुद्देशः ॥

[२] "अथ कन्यादूषणसमुद्देशः—

अविवाह्यानां कन्यकानां स्वरूपं वर्णयति—

सर्वा पिङ्गलकुन्तला कृशतनुर्दीर्घातिगौरातुला
कृष्णा केकरलोचना पृथुगला कृष्णाधरा दन्तुरा ।

(१) [illegible]

रुक्षाङ्गी विकटस्तनी च मचला विभ्रूर्वीरात्मजा
वाचाला बहुभोजना च गदिनी प्रौढा च दुःखान्विता ॥४॥
पुष्पक्ष्माधरवृत्तदेशनटिनी नक्षत्रसंज्ञा च या
हास्ये कूपयुगं कपोलफलके यस्या भवेत् मत्वरम् ।
अङ्गुष्ठाधिकपर्वणी चरणयोर्यस्याश्च जाताङ्गुलिः
पादस्यापि कनीनिका न पतति क्ष्मायां तदन्यैव वा ॥५॥

"प्रकारान्तरेण कन्यादूषणानि वर्णयति—

"अज्ञातान्वयजा स्वभावपिशुना लम्बाधरा चञ्चला
कुष्ठिश्वित्रिकुलोद्भवा च वितता यस्याः कटिर्नासिका ।
निन्द्या पल्लवजिह्विका द्रुतगति न्यूनाधिकाङ्गी पुन-
स्त्याज्याकामकलाकलापकुशलैः कन्या विवाहे सदा ॥६॥

इति कन्यादूषणसमुद्देशः—

(३) "अथ वरलक्षणसमुद्देशः—

प्रख्यातोऽमलवंशजो नववयाः शूरश्च शीलाश्रयः
मानार्हः स्थिरसौहृदो गुणनिधिर्नानाकुटुम्बी धनी ।
धर्मार्थीगतरोगको विशिष्टवचनो दाक्षिण्यधैर्याश्रयः
जामाता जगतीतले कविवरैरेवंविधो वर्णितः ॥७॥

इति वरलक्षणसमुद्देशः

"अथ वरदूषणसमुद्देशः—

(४) "अथ वरस्य दूषणानि वर्णयति—

"पापिष्ठो व्यसनी ऋणैरुपहतो द्यूतप्रियो भिक्षुको
रोगी पुंस्त्वविवर्जितश्चलमतिर्व्वैदेशिकः कातरः ।
गर्व्वी दुष्टकुलोद्भवश्च कृपणो वृद्धो द्विचर्मा खलः
कर्त्तव्यो न वरः कदापि पुरुषैरेवंविधो भूतले ॥८॥

इति वरदूषणसमुद्देशः ॥

(५) "अथ विवाहभेदसमुद्देशः ।

अथ विवाहस्य अष्टौ भेदान् गणयति

आर्षो दैवतक प्रजापतिभवो ब्राह्मो द्विजानां मतो
गान्धर्वः सह राक्षसेन कथितः क्षात्रस्य तज्ज्ञैरमौ ।
पैशाचासुरसंज्ञितौ निगदितौ वैश्यस्य शूद्रस्य च
सङ्क्षेपादुपवर्णितं क्रमवशात्पाणिग्रहे लक्षणम् ॥९॥

"अथ आर्षविवाहलक्षणं निरूपयति—

"विद्यावान् गुणपूजितः सुचरितः सद्वंशजातो मुनिः
सौम्यो मानगतः सुशीलविनयो गेहागत प्रार्थितः ।

(१) "[illegible] ॥

(२) [illegible] — । [illegible]—
[illegible]
[illegible] ॥
[illegible]
[illegible] ॥९॥

(३) [illegible] ।

कन्याया गृहनायकं मपुलकं स्तस्मै ददात्यादरात्,
आर्षो गोयुगदक्षिणो निगदितस्तज्ज्ञै विवाहोवरः ॥१०॥

"देवतविवाहस्वरूपं निरूपयाति–

ऋत्विग्भिः परिमण्डिते बहुतिथं यज्ञोत्सवे चोत्तमे
नानावर्णसुवर्णवस्त्रकुसुमैराभूषिताङ्गी शुभा।
कन्या दक्षिणयाऽद्विनीयविधिना यद्दीयते सादराद्
दैवः सोऽयमुदीरितः कविवरैरित्थं विवाहो वरः ॥११॥

"प्राजापत्यविवाहं लक्षयति–

कन्या बान्धवसन्निधौ सुललिता विप्रोत्तमायादराद्
उक्त्वा–"तुभ्यमियं मया स्वतनया दत्तेति हर्षान्विता।
धर्मं सञ्चरतां यथासुखमुभौ सम्पद्य योगं सदा
प्राजापत्यकरग्रहः कविवरैरेष प्रमाणीकृतः ॥ १२॥

ब्राह्मविवाहं निरूपयति–

आहूयार्चनपूर्वकं द्विजवरायाच्छाद्य वासोवरैः
विद्याशीलविवेकवंशविनयाचारान्विताय स्वयम्।
कन्या प्रीतिमते वराय विधिना यद्दीयते सादरं
ब्राह्मोऽसौ मुनिपुङ्गवैर्निगदितः श्रेष्ठो विवाहोऽपरः ॥१३॥

---

(१) "बहुविधे" इति च पुस्तकान्तरे पाठान्तरम्।
(२) "द्विजाय विधिना" इति च पुस्तकान्तरे पाठान्तरम्।
(३) "सौहृदम्" इति च पुस्तकान्तरे पाठान्तरं न समीचीनम् ॥

गान्धर्वादिविवाहत्रयं निरूपयति–

कन्या यौवनकामिनी पतिममुं या स्वीकरोति स्वयम्
गान्धर्वः स हि कथ्यते, भुजबलादाकृष्यते यत्पुनः ।
ज्ञेयो राक्षस एष पण्डितवरैः, चौर्याद्विवाहोऽपरः
पैशाचः कविशेखरेण कथितस्त्याज्यः सदा यत्नतः ॥१४॥

आसुरविवाहं निरूपयति–

आदायप्रथमं वराद्बहुतरं शुल्कं यथाकाङ्क्षया
वस्त्रालङ्कृतिवर्जनेन तनयामल्लोपमुत्पाद्य च ।
पश्चाद्दुष्कुलसम्भवाय मलिनं कन्याप्रदानं वृथा
प्रख्यातो निजवंशनाशपरिणयस्तज्ज्ञैरसावासुरः ॥ १५ ॥

इति विवाहलक्षणसमुद्देशः—

(६) "अथ परदारत्यागसमुद्देशः—

परदारग्रहणे दूषणानि वर्णयति—

धर्मश्रद्धामुपहास्यतां मलिनतामर्थक्षयं लाघवं
गर्हां ग्लानिमधोगतिं विकलतामायुःक्षतिं दुर्गतिम् ।
इत्थं ये परदारकर्मनिरताः लोकत्रये निन्दिता
विन्दन्ते परमापदः सुखधिया दुःखं नरास्ते सदा ॥ १६ ॥

उदाहरति—

पौलस्त्यः सुरदैत्यमर्त्यमुकुटव्याघृष्टपादाम्बुजो
मैथिल्याहरणादवाप मरणं वालिश्च ताराज्यतः ।

(१) पद्यमिदं मूलपुस्तके न दृश्यते ।

पाञ्चालीप्रतिकाङ्क्षितेन निभृतं भीमान्मृतः कीचकः
तस्मादन्यवधूर्नरैर्न मनमाप्यालापनीया भुवि ॥ १७ ॥

इति पारदारिकसमुद्देशः—

[७] "अथ दूतीसमुद्देशः—

"दशकामदशाः—

चक्षु प्रीतिरुदीरिता प्रथमतश्चित्तास्थिति स्यात्ततः
सङ्कल्पस्तदनन्तरं निगदितो निद्राविनाशस्तथा ।
वैराग्यं विषयस्यकीर्तनमतो व्रीडाविनिवृत्तिस्ततो
ऽत्युन्मादोमरणं दशप्रकटिताःकन्दर्पचेष्टा इति ॥ १८ ॥

परदारगमने समयं निरूपयति—

कामिन्या नवयौवनेन, मिलति स्वेच्छाविहारोनृणा
मुन्मादोमरणं तदामनसिजव्यामोहतो जायते ।
तस्मात्तद्विनिवारणाय पुरुषैरन्याङ्गनाचात्मभि
र्द्रष्टव्येति वदन्ति काश्यपमरुद्घोमेन्द्रवात्स्यायना ॥ १९ ॥

अथ पूर्वश्लोकवर्णितस्वेच्छाविहारादीनुदाहरति-

तारापीडसुतो विनःशमगमत्कादम्बरीकाङ्क्षया
व्यामूढःकिलपुण्डरीकमुनिरप्युच्चैर्महाश्वेतया ।
उर्वश्या च पुरूरवानरपति मन्न्याजितोजीवितं
तस्माद् गर्हितजीवितं वहुविधंमन्त्याजितं राजभिः ॥ २० ॥

---

(१) पद्मुक्ते दूतामसुद्देशे आरम्भिकपद्यत्रय नोपलभ्यते ॥

अथ दौत्यकर्मोचिताः स्त्रियोनिरूपयति—

दासीवाग्वधूर्नटी च विधवा वाला च धात्रीतथा
कन्या प्रव्रजिता च भिक्षुवनिता सम्बन्धिनी शिल्पिनी ।
मालाकारनितम्बिनी प्रतिसखी दौत्ये स्मृता योषितः
आलाप्याः कविभिः मदेचमदनव्यापारलीलाविधौ ॥२१॥

इति दूतीसमुद्देशः ॥

[८] अथ सुखसाध्यासमुद्देशः —

"प्रौढा कान्तविमानिता वहुगुणा रम्याऽनपत्या तथा
रण्डा स्वैरपरा स्वतन्त्रगमना शिल्पा प्रिया गायिनी ।
पण्ढोन्मत्तदरिद्रमेवककथ रोगार्तिसम्पीडिता
नूनं सिद्धयति दूतिका निगदिता रम्याभिमार्गेत्सवे ॥ २२॥

इति सुखसाध्यासमुद्देशः ॥

[६] अथ कष्टसाध्यासमुद्देशः—

एका वल्लभरचिता परजनालापे विरक्ता दृढा
निस्नेहा गुरुर्यौवना गुरुजनाद्भीता च लज्जावती ।
स्वस्था सुन्दरनायका पतिरता शिष्यादिकान्ता तथा
दुःसाध्या कविशेखरेण रमणीप्रोक्ता रतिप्रार्थने ॥ २३ ॥

इति कष्टसाध्यासमुद्देशः ।

(१) "गुरुर्यौवना" इति पाठान्तरम् ।

(२) 'रतप्रार्थने, इति च पूर्वार्ये पाठान्तरम् ।

[१०] अथ त्याज्यस्त्रीगमसुद्देशः ।

त्याज्याः स्त्रियो गणयति—

अज्ञाता द्विजवल्लभा गुरुवधूर्मित्राङ्गना रोगिणी
चेटी प्रव्रजिता सती रिपुवधूः शिष्या च गर्भान्विता ।
अश्रुणी मृतसन्ततिः खलजना चास्पृश्यजा गोत्रजा
गन्तव्या न कदापि तत्र पुरुषैरेताः स्त्रियःकामिभिः ॥ २४ ॥

इति त्याज्यस्त्रीसमुद्देशः ॥

(११) अथ सुरतस्थानसमुद्देशः—

अथ त्याज्यस्थानानि निरूपयति

नद्यां देवगृहे चतुष्पथवटे शैलस्य मार्गे जले
गुर्वग्निद्विजसंनिधौ परगृहे दुर्गे श्मशाने वने ।
सन्ध्यायां दिवसे कदापि सुरतं पुम्भि विंरुकाञ्जलिं
दृष्ट्वाऽनेन विरोधमङ्कटमिति त्याज्यं सदा यत्नतः ॥२५॥

अथ सुरतोचितानि स्थानानि वर्णयति

स्फुरद्दीपशिखोज्ज्वले सुललिते रम्योन्नते सुस्तरे
धूपोद्गारमनोहरे सुकुसुमस्रग्दामशोभान्विते ।
वीणातालरवाकुले मनसिजप्रस्तावनानन्दिते
सम्भोगः कुशलैः स्वकीयभवने कार्यो यथाकाङ्क्षया ॥२६॥

इति सुरतस्थानसमुद्देशः ॥

---

(१) 'योगिनी' इति पाठान्तरम् । (२) गमनानिषेधकारणम् भूमिकायां अस्मत्कृतायाम् तत्रैव द्रष्टव्यम् ।

(३) ध राजक पुस्तके समुद्देशोऽयं नोपलभ्यते ।

(४) नार्जुणकोऽयशब्दस्तेन नदागमायस्यार्थः मङ्गच्छत । "पल" इत्यत्र जलनध्यगनस्थयोऽर्थः वरणीय. ।

(१२) "अथ अभिलापसमुद्देशः—

अभिलापव्यञ्जकानि चेष्टितानि निरूपयति

उक्ता गच्छति लज्जिता विरमति प्रेम्णा मनागीक्षते
केशानाञ्च विजृम्भणं रचयति प्रस्तौति गाथां मुहुः ।
आलिङ्गनपरा स्थिराति परुषं चुम्बत्यमी बालकं
गात्रं भजति जृम्भते विहसति प्रत्युत्तरं याचते ॥२७॥

इति अभिलापसमुद्देशः ॥

(१३) "अथ आलिङ्गनसमुद्देशः—

रमणीरागोद्रेकजननाय आलिङ्गनानि निरूपयति–

माल्यापूरितकुन्तल सुवचनः स्निग्धाङ्गरागोज्ज्वलो
नानाभूषणसुन्दरः स्मरमस्ताम्बूलपूर्णाननः ।
स्फूर्जद्दीपमनोज्ञवासभवने शय्यातले नायको
रागार्थं परिरम्भणं प्रथमतः कुर्यात्समं योषिता ॥२८॥

अथ आलिङ्गनभेदान् निरूपयति–

"वृक्षारूढकसंज्ञकं प्रथमतस्तस्माल्लतावेष्टितं
तस्माज्जघनविद्धकावपि मतावूरूपगूढं पुनः ।
ज्ञातव्यं तिलतण्डुलं स्मरविदामालिङ्गनं योषितां
क्षीरं नीरपुरःसरं निगदितं तस्माच्च लालाटिकम् ॥ २९ ॥

अथ वृक्षाधिरूढाख्यमालिङ्गनं लक्षयति–

एकेन पादेन पदं स्वभर्तु-
रन्येन चाक्रम्य तदूरुभागम् ।
आपीड्य दोर्भ्यामपि कान्तपृष्ठं
वृक्षाधिरूढं प्रवदन्ति तज्ज्ञाः ॥ ३० ॥

(१) "मुक्ता गच्छति" इति च पुस्तकान्तरे पाठान्तरम् ।

अथ लतावेष्टितकमालिङ्गनं वर्णयति=

ऊर्ध्वं भुजाभ्यां मम्लाङ्गयष्टी-
श्रोणीरुहं वल्लिरिवाऽधिरुह्य ।
नारी प्रियं चुम्बति निम्नरङ्गा
भवेल्लतावेष्टितसंज्ञकं तत् ॥ ३१ ॥

अथ जाघनमालिङ्गनं वर्णयति=

श्रोणीतटे बाहुयुगेन कान्त-
मापीड्य मुक्ताम्बरकेशभागम् ।
वक्त्रामृतं स्वादयति प्रहृष्टा
तज्ज्ञैः स्फुटं जाघनमेतदेव ॥ ३२ ॥

अथ विद्धकाह्वयमालिङ्गनं लक्षयति=

स्थितोपविष्टं पुरुषं पुरन्ध्री
सम्मीलिताक्षं स्वकरप्रबन्धात् ।
आविध्यति प्रेमलसत्कुचाभ्या-
मालिङ्गनं विद्धकमेतदाहुः ॥ ३३ ॥

अथ ऊरूपगूढमालिङ्गनं लक्षयति—

कान्तो मनोजव्यथिताङ्गयष्ट्यां-
आपीडयेदूरुयुगं युवत्याः ।
ऊरूपघातेन कविप्रवीरै-
रूरूपगूढं तदिदं प्रदिष्टम् ॥ ३४ ॥

---

(१) "सिद्धार्थमालिङ्गनमेतदाहुः" इत्यत्र दृश्यमानोऽयमिति पाठान्तरमसमीचीनं, सिद्धार्थालिङ्गनस्य पुनरन्यत्रानुपलभ्यमानत्वात् इति रहस्योक्त विद्धकलक्षणादस्याः समञ्जसपुंस्त्वपाठविरोधाच्च । रतिरहस्ये विद्धकलक्षणमित्थं यथा—
"यद् गच्छन्ती स्मितवदना स्थितोपविष्टं पुरुषं स्तनाभ्याम् ।
नितम्बिनी विध्यति तावत् गाढं गृह्णात्यसौ विद्धकमुच्यते तत् ॥"

(२) "व्यथिताङ्गयष्ट्या" इति पाठान्तरम् ।

अथ तिलतण्डुलाख्यमालिङ्गनं निरूपयति-

"यद्बाहु-वक्षो-जघनेन गाढ-
मन्योन्य-संसक्त-शरीर-यष्ट्योः ।
कान्तस्य गाढं समुपाकृतोऽय-
मालिङ्गनं तत्तिलतण्डुलाख्यम् ॥ ३५ ॥

अथ क्षीरनीराख्यमालिङ्गनं वर्णयति=

गात्रे-परिष्व-ङ्ग तल्पमध्ये
संलीयते तन्मिथुनं शरीरे-
कामाभिमानात् कृतपूर्णचेष्ट-
मालिङ्गनं क्षीरजलं प्रदिष्टम् ॥ ३६ ॥

अथ लालाटिकमालिङ्गनं निरूपयति=

अन्योन्य-संसक्त-मुखं च बाहू
नेत्रं ललाटं हृदयं कपोलम् ।
आनन्द-भाव-श्रम-मीलिताक्षं
लालाटिकं तत्त्वविदो वदन्ति ॥ ३७ ॥

इत्यालिङ्गनसमुद्देशः ॥

अथ चुम्बनसमुद्देशः=

[३४] अथ चुम्बनस्थानानि गणयति=

गण्डस्थली मस्तक-दन्तवासो-
ग्रीवा-कुचोरःस्तनचूचुकानि ।
आलिङ्गनानन्तरमेव यूनोः-
स्थानानि चुम्बस्य वदन्ति सन्तः ॥ ३८ ॥

(१) "यन्मिथुन" इति सर्वाचार्यानते प्रतिभाति ।
(२) "स्थल" इति पपुस्तकीयं पाठान्तरम्
(३) "नज्ञा" इति पपुस्तके दृश्यते ॥

देशसात्म्येन अन्यानि चुम्बनस्थानानि निर्दिशति—

कक्षायुगं वापि नितम्बिनीनां
कन्दर्प-राग-स्फुरण-प्रवीराः ।
चुम्बन्ति कामं तरलायताक्ष्या-
देशस्य सात्म्येन मर्दय लायः ॥ ३९ ॥

अथ निमिताख्यं चुम्बनं लक्षयति—

कान्ताऽङ्गनाया वदने स्वकीय-
माक्षिप्य वक्त्रं कुतुकेन यत्र ।
न चुम्बति क्रोधवशेन नारी
स्याच्चुम्बनं तन्निमितामिधानम् ॥ ४० ॥

अथ स्फुरिताख्यं चुम्बनं निरूपयति—

पत्युर्मुखे तु स्वमुखं निवेश्य
प्रेम्णा मनागश्चति दन्तवेष्टम् ।
उर्ध्वेन गृह्णात्यपि कम्पितोष्ठी
प्रोक्तं मुनीन्द्रैः स्फुरितं विनोदात् ॥ ४१ ॥

अथ घृष्टाभिधानं चुम्बनं दर्शयति—

"हस्तेन नेत्रे परिमील्य भर्त्तुः
सम्मीलिताक्षी वदने स्वजिह्वाम् ।
निक्षिप्य च क्रीडति यत्र लोला
ख्यातं रमज्ञैः खलु घृष्टसंज्ञम् ॥ ४२ ॥

---

(१) निमितकलक्षणं रतिरहस्ये त्वन्यथैव वर्ण्यते—"निमितकमिदमाहु र्योजिता यद्बलेन प्रियमुखमभिवक्त्र न्यस्य निश्चलदासया,, इति ।

(१२) रतिरहस्ये घृष्टाख्यमालिङ्गन "घट्टितनाम्ना निर्दिष्टम् ।

अथ पीडिताख्यं चुम्बनं निर्दिशति—

हस्ताङ्गुली सम्पुटकेन यत्र
कान्तोष्ठमादाय रमज्ञया च ।
आस्वादयेे निर्दशनं विनोदात्
स्याच्चुम्बनं पीडितमेतदेव ॥ ४३ ॥

अथ सम्पुटाख्यं चुम्बनं लक्षयति—

कान्तामुखं स्वाधरसम्पुटेन
पीत्वा मुहुः स्वादयति क्रमेण ।
नारी च तेनैव विधानकेन
ज्ञेयं मुनीन्द्रैरिति सम्पुटाख्यम् ॥ ४४ ॥

अथ समोष्ठसंज्ञकं चुम्बनं लक्षयति—

ओष्ठेन कान्तोष्ठयुगं निपीय
जिह्वां निधायाऽप्यथ तालुभागे ।
चुम्बोत्सवे नृत्यति यत्र नारी
प्रोक्तं समोष्ठं मुनिभिः पुराणैः ॥ ४५ ॥

इति चुम्बनसमुद्देशः ॥

(१५) अथ नखाघात समुद्देशः—

अथ नखक्षतस्थानानि कथयति—

कक्षा-कुचो-रः स्थल-कुक्षि-नाभि
श्रोणी-ललाटाऽङ्घ्रि-करेषु सद्यः ।

---

(१) "अंगुलि सम्पुटेन पिण्डाकृत्य निर्दशनमोष्ठपुटेनावपीडयेत्—इत्यवपीडितं पञ्चममपि करणम्,, इति वात्स्यायनीय सूत्र निर्दिष्टं पीडितलक्षणमनुकरोति लक्षणमेतत् ॥

(२) "कुचोरस्थल' इति पाठान्तरम् ।

साङ्गुष्ठमथाङ्गुलिकैश्च सर्वैः
सेव्यः सदैव स्तनकन्धरादौ ॥ ४६ ॥

अथ छुरिताख्यंनखक्षतं निरूपयति–

सस्थापनं मन्मथ-राग-राशे–
रुक्तं मुनीन्द्रैश्छुरिताभिधानम् ।
वक्षोजकन्दर्पगृहाधरेषु
देयं नवोढा प्रमदाजनानाम् ॥ ४७ ॥

अथ अर्द्धेन्दुसंज्ञं नखक्षतं निरूपयति—

कण्डूयनेनैव शिरोरुहाणा
मस्योपयोगं परिकीर्तयन्ति ।
अर्द्धेन्दुसङ्काशमिदं नखजं
रर्द्धेन्दुसंज्ञः कथितः समासात् ॥ ४८ ॥

अथ मण्डलाख्यंनखक्षतं वर्णयति—

कक्षानितम्ब-स्तन-पार्श्वकेषु
दातव्यमेतत् करजं सदैव ।
अर्द्धेन्दुसंज्ञद्वितयं प्रयुक्तं
स्यान्मण्डलाख्यं मदनावर्तनम् ॥ ४९ ॥

अथ शशकप्लुताख्यं नखक्षतं निरूपयति=

ऊरूतटे कामगृहे नितम्बे
प्रोचुर्मुनीन्द्रा विनियोगमस्य ।
स्यादेव सर्वैर्नखरैः सुलग्नै
र्मार्जः किलोक्तं शशकप्लुताख्यम् ॥ ५० ॥

(१) "सेव्यः स एष स्तन- कन्धरादौ" इति पाठान्तरम् ।

सीमन्तपार्श्वे हृदि चूचुकाद्यां
श्वन प्रयोज्यं सुरतप्रयोगे ।

अथ मयूरपादं निरूपयति

सर्वाङ्गुलिस्फुरन्नखैः स्तनान्तः
पश्चाद्यथाङ्गुष्ठभवेन रेखा ।' ५१ ॥
व्यक्तीकृता या मुनयस्तदैत-
न्मयूरपादं समुदीरयन्ति ।

अथ पङ्कजपत्रसंज्ञं नखक्षतं निरूपयति

अलम्बमेवं स्फुरिताङ्करेखं
प्राहुःक्षतं पङ्कजपत्रसंज्ञम् ॥ ५२ ॥

अथ दुर्दरकं निरूपयति

रेखायुगं चोज्ज्वल-काम-भावः
स्तने च कक्षा-जघनान्तरेषु ।
विश्लेष देशान्तरगे च नारी-
संस्मारकं दर्दुरकं वदन्ति ॥ ५३ ॥

नखक्षतानां कामावेशजनकत्वमुपपादयति—

पुंसः शरीरे युवतीकुचे वा
क्षतं नखस्य प्रतिवीक्ष्य सद्यः ।
कन्दर्परागाकुलचित्तवृत्ति-
र्मुनेरपि स्यात् किमुचित्रमस्य ॥ ५४ ॥

करजक्षतानां काममर्वस्वस्वरूपत्वं निरूपयति—

सर्वस्वमेवास्ति मनोभवस्य
प्रेम्णा प्रयुक्तं करजं रतज्ञः ।

नाऽस्माद् द्वितीयं भुवि रागवीज
मित्याह शीतांशुकलापकेतुः ॥ ५५ ॥

इति नखाघातसमुद्देशः ॥

अथ दशनघातसमुद्देशः—

दन्तप्रकाराश्च नखप्रकारै
र्ज्ञेयाः समा एव समैश्च सद्भिः ।
शीत्कारहुङ्कारविचेष्टताद्यैः
प्रायो विशेषाः पुनरेव कार्याः ॥ ५६ ॥

अथ दशनाघातस्थानानि निरूपयति—

तथा नखास्तीव्रमुखाः समाङ्का
रागस्पृशो निर्मलदीप्तिभाजः ।
दन्ता प्रदेया नखदानदेशे
चक्षान्तगाधिद्वितयं विहाय ॥ ५७ ॥

इति दशनाघातसमुद्देशः ॥

अथ केशाकर्षण समुद्देशः

केशाः कीदृशाः भवेयुरिति दर्शयति

"भव्या घना रौक्ष्यविवर्जिता च श्यामा विशाला बहुलाः कचाः स्युः ।
चुम्बप्रदानावसरे प्रयोज्या रागोदयार्थं तरुणीजनानाम् ॥५७॥

इति केशवर्णनसमुद्देशः ॥

इति कविशेखर ज्योतीश्वरविरचिते पञ्चसायके चतुर्थः सायकः ।

(१) "समुन्नतं पद्यमिदं पत्यते"

सम्वेष्ट्य सर्वाङ्गुलिभिः कचाग्रं यस्याः पति धारयति स्मरार्ताम् ।
भुजङ्गवल्ली परिकीर्तितेयं स्तोम्यैव केशकलाविधिज्ञैः ॥५८॥

[२] अथ उत्तानवन्धसमुद्देशः ।

अथ "तत्तद्‌वन्धाश्रयणेन कारणं-" निरूपयति-

"प्रमाग्निताम्-द्वय-मध्ययोगा-
द्गाढापि नारी श्लथतामुपैति ।
मेलप्रजानुद्वयवन्धयुक्ता
श्लथापि सङ्कोचमलं प्रयाति ॥५॥

वन्धविधाने ज्ञातव्यविषयं दर्शयति-

"तस्या युवत्याः प्रकृतिश्च सत्वं
देशश्च भावं मदनातपत्रम् ।
आलोक्य वन्धा परिकल्पनीया
सम्भोग-काले पुरुषैरभिज्ञैः ॥ ६ ॥

उत्तावन्धविधिं निरूपयति-

उत्तानसुप्ता प्रमदोरुमध्ये
स्थितः पतिः कामयतेप्रकामम् ।
तयोर्द्वयोः प्रीतिकरः प्रदिष्टो
वन्धोनराणामतिदुर्लभोऽयम् ॥ ७ ॥

---

(१) ' युवत्याः" इति पुस्तकान्तरे पाठान्तरम् । तच्चासमीचीनम् ॥
(२) "गतज्ञ " इति पाठान्तरम् ।
(३) नागरोऽयम्' इति पाठान्तरम् ।

पङ्क्त्यांस्थितो हस्तयुगश्च भूमौ
त्रैविक्रमः स्यादिति निम्बराजः ॥ ११ ॥

"अथ चाटुकफेलुकाख्यं बन्धंनिरूपयति-

"नितम्बबिम्बं किल नायकेन
नार्यास्त्रिकं हस्तयुगेनधृत्वा ।
गुल्फौनिधाय स्थित एव तस्या-
बन्धोऽप्ययमौ चाटुकफेलुकः स्यात् ॥ १२ ॥

अथ अवदारिताख्यं बन्धं निरूपयाति-

कान्तस्यवक्षः स्थलगौ च पादा
वालिङ्ग्य गाढं प्रमदा कराभ्याम् ।
किञ्चिन्नतोरुद्वययोगकश्च
ज्ञेयो बुधैरित्यवदारितोऽयम् ॥ १३ ॥

इत्युत्तानबन्धसमुद्देश

"अथ पार्श्वबन्धसमुद्देशः—

उपवीतकाख्यं बन्धं दर्शयाति

एकं युवत्या हृदयं स्वपादौ
तथार्पितं तल्पगतं तदन्यम् ।
यदाङ्गना वल्लभ एषबन्धः
स्यात पृथिव्यामुपवीतकाख्य ॥ १४ ॥

---

१ (?) "चाटुक फेल्क " इति पाठान्तरम् ।

"कीर्तिबन्धंलक्षयति—

कान्तो नितम्बास्थित एवनार्याः
श्रोणीं कराभ्यां यदि यातिधृत्वा ।
आस्फालयेद्वापि कटिप्रबन्धात्
प्रोक्तोमुनीन्द्रैरिति कीर्तिबन्धः ॥ १८ ॥

इत्युपविष्टबन्धसमुद्देशः ॥

[५] अथ अधोमुखबन्धसमुद्देशः—

हारिणाख्यं बन्धं लक्षयति—

"अधोमुखस्थां रमयेच्च नारीं
तत्पृष्ठवर्ती पशुतुल्यरूपः ।
भर्तापरिक्रीडति भावहीनो
निर्दिश्यते हारिणबन्ध एषः ॥ १९ ॥

दन्तावलादिबन्धान् निरूपयति—

"दन्तावल-च्छाग-तुरङ्गमाणां
क्रीडाप्रकारैश्च भवन्ति बन्धाः।
इत्थंप्रकारैरनुपासनीया
नोदाहृता विस्तरभीतितस्ते ॥ २०॥

---

१) "विस्तरभारतस्ते" इति कपुस्तके लिखितम् ॥

इत्यादिकं भूरिविधं रटन्ती
प्रायःसुखं विन्दति केलिरङ्गे ॥ २४ ॥

विपरीतरतावयोग्यां स्त्रियं दर्शयति–

अल्पप्रयुक्ता ऋतुयोगयुक्ता
गर्भालसा स्थूलतनुर्नताङ्गी ।
क्षीणा नवोढा ज्वरिता च नारी
वर्ज्यारतिज्ञैः विपरीतबन्धे ॥ २५ ॥

इति पुरुषायितसमुद्देशः ॥

[८] अथ सीत्कृतादिसमुद्देशः—

अथ सीत्कृतं लक्षयति—

“द्रवति यदि न नारी प्रौढरागार्तियुक्ता
मृदुनिधुवनयोगे दन्तसन्धौ समीरम् ।

---

(१) “अल्पप्रसूता” इति स्थूलतराय पाठान्तरम् ॥

(२) एकस्मिन् पुस्तके सात्कृतादिसमुद्देशस्य पाठान्तरमिदमधिकमुपलभ्यते–

अथ सत्ताडितसमुद्देश

“कामस्वामावान्मदनस्य रागो हस्तप्रहारादतिमभ्युपैति ।
तस्माद्यथास्थानमसौ विधेयो विशङ्कनाना सुरतोपदेशे ॥ १ ॥
पृष्ठकस्यान्तर्हृदि प्रहारा मुष्ट्या भजन्ता सुरतोपचारे ।
सन्ताडितं नाम वदन्ति तज्ज्ञा विस्तारहस्तेन तदा पतारम् ॥ २ ॥
साङ्गुष्ठमध्याङ्गुलसम्प्रहारात् स जायते कुण्डलनामधेयः ।
स भेदनाङ्गुष्ठमवोऽभिधानं प्रोक्तं स्त्रीन्द्रैः स तु विन्दुमान् ॥ ३ ॥

विरति दशनदानः शिथिलकुन्तल भूपः
श्रमितनिरत स्वेदं सीत्कृतं गायति ॥ २६ ॥

अथ स्तनितलक्षणं निरूपयति—

पिव सिञ्चितमन्दं कोमलाधरशाला
स्तनितमनुरागनिःस्यन्दा इव पार्श्वा।
सुरतजनितरागो कस्यचित्रा वदन्ति
स्तनितमिति समस्तं चित्तसंभोगकाले ॥ २७ ॥

एवाभिधेयकरणस्य फलं निरूपयति।

इत्यादिभेदैः सुभ्रुकामकार्यं
सम्पादनार्थ पुरुषोऽभिनिवेश।
रागानुरागौ स्तनि प्रकामं
सौख्यं समाप्नोत्ययमेव विधिम् ॥ २८ ॥

इति सीत्कारादि समुद्देशः ॥

(इति पञ्चमः सायकः)

इति श्रीकविशेखर ज्योतिरीश्वरविरचिते पञ्चसायके पञ्चमः सायकः ॥

समाप्तश्चायं ग्रन्थः ॥

(१) [illegible]
[illegible] ।
[illegible] ॥

(अथ मधुस्नर्कीयं परिशिष्टं पाठान्तरम्)

“पञ्चमः सायकः—

[६] "अथ नायिकासमुद्देशः–

अथ स्वाधीनपतिकायाः स्वरूपंनिरूपयति–

"यस्याः पतिर्लिखति केलिकथानुरक्तः
पार्श्वं न मुञ्चति मनोभववेगयुक्तः ।
स्यात्सुन्दरी सकलसौख्यकलानिधाना
स्वाधीनपूर्वपतिकेति वदन्ति तज्ज्ञाः २६ ॥

अथ उत्कण्ठितायाः स्वरूपं निरूपयति=

पुष्पाङ्गराग-रुचिरा तरुणी प्रियस्य
तिष्ठत्यनागमनहेतु-विचारलोला ।
एषाऽबला न हि चिरं परिदेवनीया
सोत्कण्ठितेति कथिता कविभिःपुराणैः ॥ ३० ॥

"अथ वासकसज्जितायाः स्वरूपं निरूपयति=

स्रक्चन्दनाम्बरविभूषणभूषिताङ्गी
या वल्लभागमन-मार्ग-निरूढ-दृष्टिः ।
तल्पंगता रुचिरवासगृहेऽवशेते
सा कीर्तिता जगतिवासकसज्जितेति ॥ ३१ ॥

अथ कलहान्तरितायाः स्वरूपंवर्णयति=

क्रोधात्प्रयातिचरणे पतितोऽपि कान्तः
प्रायःप्रचण्डवचनाञ्चरणैर्निरस्तः ।

---

६ (१) समुद्देशोऽयं मपुस्तके पञ्चमसायकसमाप्तौ दृश्यते इति प्रागेव परिशिष्टे निर्णीतम् ।

[illegible] [illegible]
सा कीर्तिता [illegible] कवीन्द्रैः ॥ ३२ ॥

अथ विप्रलब्धायाः लक्षणं लक्षयति—

"संकेतकं प्रियतमः स्वयमेव दत्वा
नैवागतः [illegible] गमयेच्च यस्याः ।
दूता [illegible] [illegible]
सा वर्णिता कविवरैरिह विप्रलब्धा ॥ ३३ ॥

"अथ खण्डितायाः स्वरूपं निरूपयति=

"प्रातर्विनिद्र [illegible]
निद्रालसा[illegible] ।
यस्याः [illegible] पुरस्ता
सा खण्डितेति कथिता कविभि पुराणैः ॥३४॥

"अथ अभिसारिकायाः स्वरूपं निरूपयति=

[illegible] [illegible] च नारी
या निर्मिता हि मदनेन मदेन याति ।
[illegible] [illegible]
सा कीर्तिता कविवरैरभिसारिकेति ॥३५॥

अथ प्रोषितायाः स्वरूपं निरूपति=

"देशान्तरं प्रति [illegible] यस्या
दत्वा [illegible] गुरुकार्ययोगात् ।

(१) [illegible] ॥
(२) [illegible] ॥

दुर्वारदुःखदहनैः परिवेदिताङ्गी
सा प्रोषिता प्रियतमा कथिता मुनीन्द्रैः ॥३६॥

इत्यष्टनायिकासमुद्देशः ।

अथ ग्रन्थोपसंहरणम्—

"यावच्चन्द्रकलाकिरीटहृदये शैलाधिराजात्मजा
यावद्वक्षसि माधवस्य कमला सानन्दमादीव्यति ।
यावत्कामकलाविवर्तचटुलं क्षोणीतलं राजते
तावच्छ्री कविशेखरस्य कृतिनः काव्यं मुदे दीव्यताम् ॥३७॥

यावल्लेखां वहति शिरसा शङ्करःशीतरश्मे-
र्यावद्वेदावदनकमले ब्रह्मणःसन्तिसाङ्गाः ।
यावद्गङ्गा वहतिभुवने यावदाकाशभानु
स्तावत्कीर्तिर्वसतु विमला सा त्रिलोकीश्वपायात् ॥ ३८ ॥

इति पञ्चमःसायकः ॥

इति कविशेखर श्रीज्योतीश्वराचार्यविरचिते पञ्चसायके
पञ्चम सायकः ।

समाप्तश्चायं ग्रन्थः ॥

---

(१) घ संज्ञकपुस्तके चरमं पाटत्रर्यामत्थं पठ्यते—

यावद् भास्वान गगनं फलके द्योतयन विश्वमायाः ।
भ्राम भ्रामं चरति धरिणा यावदास्ते सशैला
तावद् गोपान्नज गणपतेः प्रीतये-काव्य मस्तु ॥ १० ॥

पञ्चमायकस्याऽशुद्धिपत्रम् ।

पृ.	पं.	अशुद्धम्	शुद्धम्
१	९	नोदया	नोदयाः
,,	११	पणाना	प्रणाना
२	७	पर्णनारो	प्रर्णनारो
,,	१०	दिहृश	दिहृश
,,	२१	चतुःपटे	चतुःपटः
,,	२५	प्रदर्भूर	प्रादुर्भूर
४	४	ःयेरादयो	ःयेरमादयो
,,	६	स्त्रियो	स्त्रियो
५	११	राम	राम
६	६	नआम्युपायाः	नान्याम्युपायाः
,,	२९	नवयान	नवयौवन
७	६	गर्हस्थ	गार्हस्थ्य
,,	६	रंगय?	रंगयः
८	१६	इथ य	न्थ ये
,,	,,	कर्मिगिरतो	कर्मिगिरताः
,,	,,	निन्दिता	निन्दिताः
,,	२२	विपुर	विपुर
९	२०	ररनया	वनन्या
११	४	नैरिमा	नैरिमा

प्रथमः सायकः

पृ.	पं.	अशुद्धम्	शुद्धम्
१	१०	मनुष्ठः	मनुष्ठः
,,	१८	पाटः	पाटः
२	५	[illegible]	स्त्र्युषन
३	१५	मदुगतः	मदगनि
४	८	चार्गा	चार्गे
५	१	स्रोगाग्न	स्रोगाग्न
७	७	भुजनारा	भुजना
,,	१०	अम्नयत्	अन्मयत्
८	१८	[illegible]	[illegible]
९	१	पूर्णमास्या	पूर्णमास्या
,,	११	रत	रत

द्वितीयः सायकः

पृ.	पं.	अशुद्धम्	शुद्धम्
११	१६	निष्कृष्यतः	निष्कृष्यते
१२	७	ख्यातिनचि	ख्यातिनीच
,,	२१	पुन्नक	पुन्नके
१३	२१	मद्रम	भद्रमे
१४	१६	नर्वार्मितः	नर्वामितः
१५	२	कम्बुगठी	कम्बुकगठी
,,	३	ज्योतिरिश	ज्योतिरीशः
१६	२	भवे	भवे-
१८	२८	पुन्नाय ग	ग पुन्नकीय
१९	४	लयचति	लक्षयति
१९	८	स्तरुगय	स्तरुगय
२०	१२	मोदहन्त्रा	मोदहन्ती
,,	२०	स्पु इति	स्पुरिति
२१	१६	नृसिम	नृसिम
२२	१५	समार	समा च
२३	१०	मचन्दन	सचन्दन
,,	२०	धर्मजनित	धर्मजनित
२४	२	शानिमल	शानिमूलः
,,	३	धर्मजगात्र	धर्मजगात
,,	७	निव्याक	निव्याक
२५	१२	चैत्रमय	चैत्रमय
,,	१०	,,	,,
,,	१६	देवः	दाप
२७	६	रक्तचन्दन	रक्तचन्दन
,,	२०	नातिशुद्धम	नातिशुद्धम
३१	१८	माद	माद
३३	५	शिशिरनन	शिशिरनल
३४	५	कुशाग	कुशादि

पृ.	प	अशुद्धम्	शुद्धम
,,	१८	विजायन	विजायन
,,	२०	पाठस्यास्या	पाठस्यास्या
,,	,,	मृत एव	मृत एव
३७	१६	मनोरनारम	मनारनारम
३६	७	गोर्णासुनेन	गार्णासुनन
४१	६	चामुण्डमन्त्रः	चामुण्डामन्त्र.
४२	८	भयरार्दा	भयरार्दा
४३	१७	इान	इति
४९	१७	धवा तु	धवास्तु
५०	१७	सुस्वप्रसव	सुस्वप्रसव
		चतुर्थ-मायक	
५४	१	हचाङ्गा	रुचाङ्गी
५०	३	ऋणरुपद	ऋणरुपद
,,	१७	उत्क्रोडति	उत्क्रोडति
,,	१८	तत्रायलभ्यते	तत्रागनभ्यत
५६	,,	गद्दनायक	गृहनायक
५६	४	ऋर्णागिन	ऋर्णागिन:
,,	१६	विधना	निजिना
६०	१७	दुस्य	दु:स्व
६५	१०	मानामिना	तन्निमिता
६६	८	सस्थापन	सस्थापन
,,	२३	रन्नारार्दा	रन्नरार्दा
		पञ्चम-माकः	
६६	१	चतुर्थ मायक:	पञ्चम मायक'
७१	१०	स्यादप	स्यादप
७२	६	पादा	पादा
७३	७	स्वनया	स्विनाया
,,	२०	पुस्तरीय	पुस्तरीय
७४	१२	इनि	इति
		परिशिष्टम्	
८०	१३	पश्चम	पञ्चम
,,	१७	पाठनय	पाठत्रयं



अपूर्वं विज्ञापनम् ।

अयि ब्रह्मानन्दसहोदरानन्दसन्दोहदोहनरमालसाः कामकलारहस्यविज्ञानलालसाः सरसहृदयाः सहृदयाः। नैतत्र विदितं श्रीमतां यद्धि नाम कामाख्यतृतीयपुरुषार्थरहस्यज्ञानमपि गृहस्थानां नितान्तमावश्यकमिति। तदर्थं च कल्याणकविरचितोऽनङ्गरङ्गाख्यो ग्रन्थो नितरामुपयोगी। एष हि सरलया भाषया सर्वं कामशास्त्रतत्त्वं सम्यगाविष्करोति तस्यैतस्य सटिप्पणस्य मुद्रणं जातम्। सन्ति चात्र शुक्लकृष्णपक्षयोः प्रतिपदादितिथिक्रमेण स्त्रीणां तत्तदङ्गेषु दक्षिणवामपार्श्वयोः कामस्यारोहावरोहौ, तत्तदङ्गस्पर्शादिना स्त्रीणामाशुद्रावणं, पद्मिन्यादयः स्त्रीभेदाः शशादयः पुरुषभेदाः आलिङ्गनादिविवरणं, चित्ररतानि, कन्यावरणं, कन्याविस्रम्भणं, स्त्रीणामनुरागविरागचिह्नानि, अनेके वशीकरणादियन्त्रमन्त्रविशेषाः, वृष्ययोगाः—इत्येवमादयो विषयः। नितान्तं गोपनीयमिदम्। अत्युपयोगिनोऽतिदुर्लभस्य चास्य मूल्यं सार्धरूप्यकं मात्रम् १॥) ये महाशया एतत्प्राप्तुमीहन्ते तैः शीघ्रमेव पत्रं प्रेष्यम् ॥

कुचीमारतन्त्र—श्रीकुचीमार मुनिप्रणीत साहित्याचार्य पं० मथुराप्रसाद दीक्षित द्वारा संशोधित।

मोतीलाल बनारसीदास,

पञ्जाब संस्कृत पुस्तकालय,

सैदमिट्ठा बाजार, लाहौर।